अर्थात् - इन्द्रवज्रा एवं उपेन्द्रवज्रा का मिश्रण उपजाति होता है।

S I S I I I S I S I S

७.रथोद्धता— रो नराविह रथोद्धता लगौ।

अर्थात्— जिस छन्द के प्रत्येक चरण में ग्यारह वर्ण-रगण, नगण, रगण तथा अन्त में लघु गुरु क्रम से हों उसे रथोद्धता कहा गया है।

I I I S I I S I I S I S

८. द्रुतविलम्बित— द्रुतविलम्बित माह न भौ भरौ।

अर्थात्— इस छन्द के प्रत्येक चरण में १२ वर्ण - नगण, भगण, भगण, तथा रगण के रूप में होते हैं।

I S I S S I I S I S I S

९. वंशस्थ— जतौ तु वंशस्थमुदीरितं जरौ।

अर्थात् - इसके प्रत्येक चरण में १२ वर्ण-जगण, तगण, जगण, रगण के रूप में होते हैं।

I S S I S S I S S I S S

१०. भुजङ्गप्रयात— भुजङ्ग प्रयातं चतुर्भिर्यकारैः।

अर्थात्— इसके प्रत्येक चरण में १२ वर्ण-चार यगणों में हो विभाजित होते हैं।

I I S I I S I I S I I S

११.तोटक— वद तोटकमब्धि सकारयुतम्।

अर्थात्—इसके प्रत्येक चरण में १२ वर्ण चार सगणों में ही विभाजित होते हैं।

SSISI IISI IS IS S

१२. वसन्ततिलका—ज्ञेयं वसन्त तिलका त-भ-जा जगौ गः।

अर्थात्—इसके प्रत्येक चरण में १४ वर्ण - तगण, भगण, जगण, जगण, तथा अन्त में दो गुरु के रूप में विभाजित होते हैं।

IIIIIISSSISSISS

१३ मालिनी— नन म य य युतेय मालिनी भोगिलोकैः।

अर्थात् इसके प्रत्येक चरण में १५ वर्ण - नगण, नगण, मगण, यगण, यगण के रूप में होते हैं।

ISSS SSIIIIISS IIS

१४. शिखरिणी—रसैः रुद्रैश्छिन्ना यमनसभलाः गः शिखरिणी।

अर्थात् प्रत्येक चरण में १७ वर्ण-यगण, मगण, नगण, सगण, भगण तथा लघु गुरु के रूप में हों उसे शिखरिणी कहा गया है।

SSSS IIIIISSI SSISS

१५. मन्दाक्रान्ता–मन्दा क्रान्ताऽम्बुधि रसनगैं मों भ नौ तौ गयुग्मम्।

अर्थात्—जहाँ प्रत्येक चरण में १७ वर्ण - मगण, भगण, नगण, तगण, तगण तथा दो गुरु के रूप में हों उसे मन्दाक्रान्ता कहा गया है।

SSSIISISIIISSSI SSIS

१६. शार्दूलविक्रीडित—सूर्याश्विैर्म-स-जस्तताः स गुरवः शार्दूल विक्रीडितम्

अर्थात्—जहाँ प्रत्येक चरण में १९ वर्ण - मगण, सगण, जगण, सगण, तगण, तगण तथा अन्त में गुरु के रूप में हों।

SSSS ISSIIIIIS SISSISS

१७. स्रग्धरा— म्रभ्नैयानां त्रयेण त्रिमुनियतीयुता स्रग्धरा कीर्तितेयम्।

अर्थात्—जहाँ प्रत्येक चरण में २१ वर्ण - मगण, रगण, भगण, नगण, यगण, यगण के रूप में हों।

(ग) अलंकार — (Figure of speech)

अलंकार लक्षण— शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत् ॥
(साहित्य दर्पण)

अलंकार भेद— (i) शब्दालंकाराः, (ii) अर्थालंकाराः

विशेषः—साहित्य दर्पण के आधार पर नीचे कतिपय अलंकारों के लक्षण दिये गये हैं। इनकी सहायता से अभ्यासार्थ दिये गये श्लोकों में इनके उदाहरण निश्चित कीजिए—

शब्दालंकार

१. अनुप्रास— अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।

हिन्दी—व्यंजन सम बरु स्वर असम अनुप्रास अलंकार ।

(i) छेकानुप्रास - छेकोव्यञ्जनसंघस्य सकृतसाम्यमनेकधा ।

(ii) वृत्यानुप्रास —अनेकस्यैकधा साम्यदसकृद् वाप्यनेकधा ।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते ॥

२. यमक — सत्यर्थे पृथगर्थायाः स्वर - व्यञ्जन - संहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।

हिन्दी – वहै शब्द पुनि पुनि परै, अर्थ और ही और ।

३. श्लेष— श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।

हिन्दी - श्लेष अलंकृत अर्थ दहु एक शब्द में होय ।

४. वक्रोक्ति— अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ॥

हिन्दी हों श्लेष औ' काकु ते कल्पित औरे अर्थ ।

अर्थालंकार

५. उपमा— साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः ।

हिन्दी—रूप-रंग गुन काहु कौ काहू के अनुसार ।
ताको उपमा कहत हैं जे सुबुद्धि आगार ।।

उपमा अंग—(i) उपमेय, (ii) उपमान, (iii) साधारण धर्म, (iv) वाचक शब्द ।

६. प्रतिवस्तूपमा— प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्मयोः ।
एकोऽपिधर्म सामान्यो यत्र निर्दिश्यते पृथक ।।

हिन्दी—उपमेय और उपमान को जहां विभिन्न शब्दों द्वारा एक ही धर्म कहा जाय ।

७. रूपक— रूपकं रूपितारोपे विषये निरपह्नवे ।

हिन्दी—उपमेय अरु उपमान जहँ एकै रूप लखाय ।

८. उत्प्रेक्षा— भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
भेद—(i) वाच्या, (ii) प्रतीयमाना ।

हिन्दी—जहँ कीजै संभावना सो उत्प्रेक्षा जान ।

९. समासोक्ति— समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ।

हिन्दी—प्रस्तुत के वर्णन से जहां अप्रस्तुत का वर्णन भी होता हो !

१०. अपह्नुति— प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः ।

हिन्दी—आन बात आरोपिये साँची बात छिपाय ।

११. निदर्शना— सम्भवन्वस्तुसंबन्धोऽसंभवन्वापि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना ।।

हिन्दी—जहां वस्तुओं का सम्बन्ध सम्भव या असम्भव उनके बिम्ब प्रतिबिम्बभाव का बोधन करे ।

१२. अतिशयोक्ति— सिद्धत्वेऽध्यवसायस्यातिशयोक्ति निगद्यते ।

हिन्दी—जहां प्रस्तुत का उपमान द्वारा निगरण (निगलना) दिखाया जाय ।

१३ अप्रस्तुत प्रशंसा— अप्रस्तुतात्प्रस्तुतं चेद्गम्यते पञ्चधा ततः ।

हिन्दी—अप्रस्तुत वर्णन से जहां प्रस्तुत का वर्णन किया जाय ।

१४. दृष्टान्त— दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् ।

हिन्दी—उपमेय अरु उपमान में भाव बिम्ब-प्रतिबिम्ब लखाय ।

१५. दीपक— अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥

हिन्दी—जहां प्रस्तुत तथा अप्रस्तुत दोनों का एक धर्म वर्णित हो ।

१६. तुल्ययोगिता— पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्मभिसम्बन्ध स्यात्तदा तुल्ययोगिता ।

हिन्दी—जहां अनेक प्रस्तुत या अप्रस्तुतों को एक धर्म में बाँधा जाय ।

१७. विभावना— विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।

हिन्दी—जहां कारण के बिना कारज पूरा होए ।

१८ विशेषोक्ति— सति हेतौ फलाभावे विशेषोक्तिः ।

हिन्दी—जहां कारण के अछत पुनि, काज न पूरो होए ।

१९. अर्थान्तरन्यास— सामान्यं वा विशेषेण विशेषस्तेन वा यदि ।
कार्यं च कारणेनेदं कार्येण च समर्थ्यते ॥
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा मतः ॥

हिन्दी—जहां सामान्य का विशेष से या विशेष का सामान्य से समर्थन हो ।

२०. विरोध— विरुद्धमिव भासेत विरोधोऽसौ ।

हिन्दी—जहां अविरोध में भी विरोध प्रतीत हो ।

२१. स्वभावोक्ति— स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ॥

हिन्दी—जहां बालक आदि की स्वाभाविक चेष्टाएँ वर्णित हों ।

२२. काव्यलिंग— हेतोर्वाक्यपदार्थत्वे काव्यलिंगं निगद्यते ।

हिन्दी—जहां किसी समर्थन योग्य वस्तु में हेतु दिखाया जाय ।

२३. संसृष्टि— मिथोऽनपेक्षयैतेषां स्थिति संसृष्टिरुच्यते ॥

हिन्दी—जहां अनेक-अलंकार तिल तण्डुल (तिल और चावल) की भांति मिले हों ।

२४. संकर— अंगाङ्गित्वेऽलंकृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति सकरस्त्रिविधः पुनः ॥

हिन्दी—जहां दो अलंकार नीर क्षीर (दूध और पानी) की तरह मिले हों ।

—०—

रस छन्द-अलंकारों के उदाहरण

१—सरसिजमनुविद्धं शैवलेनापिरम्यं,
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥
(शाकुन्तल १-२०)

विशेष—इसमें संयोग शृंगार, मालिनी छन्द, प्रतिवस्तूपमा तथा अर्थान्तर-न्यास अलंकार हैं ।

२—स्वप्नो नु माया नु मतिभ्रमो नु,
क्लिष्टं नु तावत्फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते,
मनोरथा नाम तटप्रपाताः ॥

विशेष—इसमें विप्रलम्भ श्रृंगार, उपजाति छन्द, सन्देह और काव्यलिंग अलंकार हैं।

३—गुरोर्गिरः पञ्च दिनान्यधीत्य,
वेदान्तशास्त्राणि दिनत्रयं च।
अमी सामाघ्राय च तर्कवादान्,
समागताः कुक्कुटमिश्रपादाः ॥

विशेष—इसमें हास्यरस, उपेन्द्रवज्रा छन्द, अनुप्रास अलंकार है।

४—यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ॥

विशेष—इसमें करुण रस, शार्दूलविक्रीडित छन्द, व्यतिरेकालंकार है।

५—विचिन्तयन्ती यमनन्यमानसा,
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्,
कथां प्रमत्तः प्रथमं कृतामिव ॥

विशेष—इसमें रौद्ररस, वंशस्थ छन्द, उपमा तथा श्लेषालंकार हैं।

६—इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललम्बे।
उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः ॥

विशेष—इसमें वीररस, औपच्छन्दसिक छन्द, श्लेषानुप्राणित उपमालंकार है।

७. ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृत्तमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।

विशेष इस श्लोक में भयानक रस, स्रग्धरा छन्द, स्वभावोक्ति अलंकार है।

८—उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयव सुलभान्युग्रपूतीनि जग्ध्वा।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ।।

विशे।—इस श्लोक में बीभत्स रस, स्रग्धराछन्द, अनुप्रासालंकार है।

९—शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः।
सन्तानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ।।

विशेष—इस श्लोक में अद्‌भुतरस, शार्दूलविक्रीडितछन्द, उत्प्रेक्षालंकार है।

१०—क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितम्
क्वचिद्विद्वद्‌गोष्ठी क्वचिदपि सुरामत्तकलहः।
क्वचिद्रामा रम्याः क्वचिदपि गलत्कुष्टवपुषो
न जाने संसारः किममृतमयः किं विषमयः ।।

विशेष - इस श्लोक में शान्तरस, शिखरिणीछन्द, अनुप्रासालंकार है।

११—आलक्ष्यदन्तमुकुलाननिमित्तहासै—
रव्यक्तवर्णरमणीयवचः प्रवृत्तीन।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनी भवन्ति ।।

विशेष—इसमें वात्सल्य रस, वसन्ततिलका छन्द, अप्रस्तुतप्रशंसालंकार है

१२. इदं किलव्याजमनोहर वपु—
स्तपः क्षमं साधयितु य इच्छति ।
ध्रुवं स नीलोत्पल-पत्र-धारया,
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥

(निदर्शना उत्प्रेक्षा, विभावना)

छन्द-उदाहरण

१. अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति ॥

(आर्या)

२. सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥

(अनुष्टप)

३. मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः ।
पर-वृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् ॥

(औपच्छन्दसिकछन्द)

४. अर्थो हि कन्या परकीय एव तामद्य सप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥

(इन्द्रवज्रा)

५. प्रजाः प्रजाः स्वा इव तंत्रयित्वा निषेवते श्रान्तमना विविक्तम् ।
यूथानि संचार्य रविप्रतप्तः, शीतं दिवा स्थानमिव द्विपेन्द्रः ॥

(उपेन्द्रव्रजा)

६. खादन्न गच्छामि हसन्न जल्पे, गतं न शोचामि कृतं न मन्ये ।
द्वाभ्यां तृतीयो न भवामि राजन्, किं कारणं भोज भवामि मूर्खः ॥

(उपजाति)

७. लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्ष्यभूतयः ।
स्वन्तमन्तविरसा जिगीषतां मित्रलाभमनुलाभ सम्पदः ॥
(रथोद्धता)

८. नवपलाश पलाश वनं पुरः स्फुटपराग परागत पङ्कजम् ।
मृदुलतान्त लतान्त मलोकयत्ससुरभिं सुरभिं सुमनोभरैः ॥
(द्रुतविलम्बित)

९. सुतं पतन्तं प्रसमीक्ष्य पावके, न बोधयामास पतिं पतिव्रता ।
पतिव्रता शापभयेन पीड़ितो, हुताशनश्चन्दनपङ्कशीतलः ॥
(वशंस्थ)

१०. नमस्तेऽस्तु गङ्गेत्वदङ्गप्रसङ्गात्, भुजङ्गास्तुरङ्गा-कुरङ्गाः-प्लवङ्गाः।
अनङ्गारिरङ्गाः सगङ्गा शिवाङ्गाः भुजङ्गाधिपाङ्गी कृताङ्गा भवन्ति॥
(भुजगं प्रयात)

११. यमुनातटमच्युत-केलि-कला - लसदङ्घ्रि - सरोरुह सङ्करुचम् ।
मुदितोऽट कलेरपनेतुमघं, यदि चेच्छसि जन्म निजं सफलम् ॥
(तोटक)

१२. रात्रिर्गमिष्यति भविष्यति सुप्रभातम्,
भावस्वानुदेष्यति हसिष्यति पंकजश्रीः ।
इत्थं विचन्तयति कोशगते द्विरेफे
हा हन्त ! हन्त ! नलिनीं गज उज्जहार ॥

(वसन्ततिलका)

१३. मनसि वचसि काये पुण्य पीयूषपूर्णाः—
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः
परगुणपरमाणून पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥
(मालिनी)

१४. यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवम्,
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः
यदा किंचिद्बुधजनसकाशादवगतम्,
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥
(शिखरिणी)

१५. जातं वंशे भुवनविदिते पुष्करावर्तकानां,
जानामि त्वां प्रकृति-पुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशात् दूर बन्धुर्गतोऽहम्
याञ्चा मोघा वरमधिगुणे नाधमेलब्धकामा ॥
(मन्दाक्रान्ता)

१६. पातुं न प्रथमं व्यवस्तति जलं युष्मास्वपीतेषु यः,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूति समये यस्याः भवत्युत्सवः,
सेयं याति शकुन्तला पतिग्रहं सर्वैरनुज्ञायताम् ॥ शार्दूलविक्रीडित)

१७. या सृष्टिः स्रष्टुराद्या, वहति विधिहुतं या हविर्या च होत्री,
ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः,
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥
(स्रग्धरा)

अपठित पद्य भाग

नोट :—कुछ उद्धरणों के अर्थ नीचे दिये गये हैं । इसी क्रम से आप शेष दिये गये अंशों का स्वयं अभ्यास करें ।

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥ १ ॥
(ऋ० १।१६४।४६)

अर्थात्—परमेश्वर वस्तुतः एक ही है, किन्तु विद्वान् ब्राह्मण उसकी सर्वव्यापकता एवं सर्वशक्तिमत्ता से प्रभावित होकर उसे इन्द्र, सूर्य, वरुण, अग्नि, दिव्य सुपर्ण, गरुत्मान्, यम, वायु आदि अनेक नामों से पुकारते हैं।

स्वभावमेके कवयो वदन्ति
कालं तदान्ये परिमुह्यमाना।
देवस्यैव महिमा तु लोके
येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ २ ॥

(श्वेताश्वतरोपनिषद्)

अर्थात्—संसार के मूलभूत कारण के सम्बन्ध में विद्वानों में मतैक्य नहीं, कुछ लोग स्वभाव को कारण मानते हैं तो अन्य लोग काल को ही मूल कारण मानने में अपने तर्क उपस्थापित करते हैं। वस्तुतः अन्य मान्यताएँ निराधार प्रतीत होती हैं क्योंकि ईश्वरीय माया के द्वारा ही सम्पूर्ण ब्रह्माण्ड सचालित होता है।

अणोरणीयान्महतो महीया—
नात्मा गुहायां निहितोऽस्य जन्तोः।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम् ॥ ३ ॥

(श्वेताश्वतरोपनिषद्)

अर्थात्—सूक्ष्मातिसूक्ष्म तथा विशालातिविशाल ईश्वर मानव के हृदय मन्दिर में विराजमान हैं, मायातीत निर्लिप्त निर्विकार उस प्रभु को जो जान लेता है फिर उसे संसारिक दुःखों का सन्ताप नहीं होता।

न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्व—
स्ततस्तु तं पश्येत् निष्कल ध्यायमानः ॥ ४ ॥

(मुण्डकोपनिषद्)

अर्थात् – अन्तःकरण को पवित्रता वाला व्यक्ति हो अपनी निर्मल ज्ञान ज्योति से परमात्मा का दर्शन करता है। क्योंकि ईश्वर आँख, वाणी आदि इन्द्रियों द्वारा सम्पादित कोरे तप आदि से अज्ञेय एवं अप्राप्य कहा गया है।

स्वस्ति मात्रे उत मित्रे नो अस्तु
स्वस्ति गोभ्यो जगते पुरुषेभ्यः।
विश्वं सुभूत सुविदत्रं नो
अस्तु योगेत्र दृशेम सूर्यम् ॥ ५ ॥

अर्थात्—इस मन्त्र में मानव मात्र के कल्याण की सदिच्छा के साथ ईश्वर से प्रार्थना की गई है कि हमारे माता-पिता एवं हमारे पशुओं (गउओं) का भी कल्याण हो और हम पूर्ण स्वस्थ तथा सुसम्पन्न होकर विश्व की सम्पदाओं का आनन्द ले सकें।

न कामयेऽहं गतिमीश्वरात्परा—
मष्टर्द्धियुक्तामपुनर्भवं वा।
आर्ति प्रपद्येऽखिलदेहभाजा—
मन्तः स्थितो येन भवन्त्यदुःखाः ॥ ६ ॥

(श्रीमद्भागवत)

अर्थात्—आठों ऋद्धि-सिद्धियों से युक्त मोक्ष की अभिलाषा मुझे लेशमात्र भी नहीं, क्योंकि ईश्वर से मेरी यही प्रार्थना है, वह मुझे ऐसी शक्ति दें कि मैं संसार के जीव-मात्र का कष्ट स्वयं सहन कर उसे सुखी बना सकूँ।

अस्मिन् महामोहमये कटाहे
सूर्याग्निना रात्रिदिनेन्धनेन।
मासर्त्तु दर्वी परिघट्टनेन
भूतानि कालः पचतीति वार्त्ता ॥ ७ ॥

(महाभारत)

अर्थात्—इस संसार में वास्तविक सत्य यह है कि भगवान् काल महा-मोहरूपी कड़ाहे में सभी जीवों को डालकर सूर्यरूपी अग्नि तथा रात-दिन रूपी लड़की की सहायता से मास और ऋतु रूपी करछुल को चला चलाकर पका रहा है।

न धर्मकालः पुरुषस्य निश्चितो,
न चापि मृत्युः पुरुषं प्रतीक्षते।
सदा हि धर्मस्य क्रियैव शोभना,
यदा नरो मृत्युमुखेऽभिवर्तते ॥ ८ ॥
(महाभारत)

अर्थात्-मनुष्य आये दिन निरन्तर मृत्यु की ओर कदम बढ़ा रहा है, अतः उसे सदा धर्माचरण करना चाहिये; क्योंकि समय की भांति मृत्यु भी किसी की प्रतीक्षा नहीं करती।

मनोरथानां न समाप्तिरस्ति,
वर्षायुतेनापि तथाब्दलक्षैः।
पूर्णेषु पूर्णेषु मनोरथाना—
मुत्पत्तयस्सन्ति पुनर्नवानाम् ॥ ९ ॥

अर्थात्-हजारों एवं लाखों वर्षों द्वारा पूर्ण होने पर भी मनोरथों की समाप्ति कभी नहीं होती; क्योंकि ज्यों-ज्यों मनोरथों की पूर्ति होती जाती है, वे नवीन रूप में पुनः उत्पन्न हो जाते हैं।

धर्मे मतिर्भवतु वः पुरुषोत्तमानां,
स ह्येक एव परलोकगतस्तु बन्धुः।
अर्थाः स्त्रियश्च निपुणैरपि सेव्यमानाः,
नैव प्रभावमुपयान्ति न च स्थिरत्वम् ॥ १० ॥
(ब्रह्मपुराण)

अर्थात्—श्रेष्ठ पुरुषों की मति धर्म की ओर प्रवृत्त हो, क्योंकि वही एकमात्र परलोक जाने पर जीव का बन्धु होता है। अर्थ और स्त्रियों द्वारा

प्राप्त सुख न तो स्थिर होते हैं और न ही वे अपना कोई प्रभाव उत्पन्न कर पाते हैं।

अन्यो न दृष्टः सुखदो हि मार्गः
पुराणमार्गों हि सदा वरिष्ठः।
शास्त्रं बिना सर्वमिदं न भाति
सूर्येण हीना इव जीवलोकः ॥११॥

(शिवलोक)

अर्थात्—सुखद मार्ग अन्यत्र न देखकर यही निष्कर्ष निकलता है कि पुराणों का मार्ग ही सर्वश्रेष्ठ है। बिना शास्त्रज्ञान के यह सब आलोकित नहीं होता जिस प्रकार सूर्य के बिना जीवलोक प्रकाशित नहीं होता।

धर्मार्थकामाः किल तात लोके
समीक्षिता धर्मफलोदयेषु।
ते तत्र सर्वे स्युरसंशयं मे
माथेव वश्याभिमता सुपुत्रा ॥१२॥

(रामायण)

अर्थात्—इस संसार में धर्म, अर्थ, काम आदि अर्थों की सिद्धि एक मात्र धर्म के अधीन उसी प्रकार है जिस प्रकार पतिव्रता स्त्री अपने पति के अधीन होती है।

तवाऽर्थधर्मश्च विलसीयते नृणां
वर्णाश्रमाचार युतस्त्रयीमयः।
ततोऽर्थकामानि निवेशितात्मनां
शुनां कपीनामिव वर्णसंकरः ॥१३॥

(श्रीमद्भागवत)

अर्थात्—शासक के अभाव में वर्णाश्रमयुक्त वैदिक धर्म का लोप होने लगता है और लोग अर्थ एवं कामना के वशीभूत होकर बन्दर एवं कुत्तों के समान भ्रष्टाचरण करते हुए वर्णसंकर होने लगते हैं।

स ईश्वरो व्यष्टिसमष्टि रूपो
व्यक्तस्वरूपोऽप्रकटस्वरूपः ।
सर्वेश्वरः सर्वदृक् सर्वविच्च
समस्तशक्तिः परमेश्वराख्यः ।। १४ ।।

(विष्णुपुराण)

अर्थात्—परमात्मा ही समष्टि और व्यष्टि रूप है वही व्यक्त और अव्यक्त कहलाता है । सबका प्रभु, साक्षी और सर्वज्ञ है इसीलिये उसे परमेश्वर के नाम से पुकारा जाता है ।

कृष्ण, त्वदीयपदपंकजपंजरान्ते
अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ।। १५ ।।

(श्रीमद्भागत)

अर्थात्—हे कृष्ण, आपके, चरण रूपी कमल वन में आज ही मेरा मन रूपी राजहंस विहार करे, क्योंकि मृत्यु के समय जबकि कफ वात पित्त आदि दोषों से कण्ठ अवरुद्ध हो जाता है, उस समय आपका स्मरण कैसे हो पायेगा ।

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ।। १६ ।।

(विष्णुपुराण)

अर्थात्—स्वर्ग और मोक्ष के मार्गभूत भारतवर्ष में जन्म लेने वाले लोगों की देवता भी प्रशंसा करते हैं क्योंकि यहाँ आने के लिये लोग देवत्व के परित्याग में भी अपना गौरव मानते हैं ।

अहो भुवः सप्तसमुद्रवत्या
द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारे
कर्माणि भद्राण्यवतारयन्ति ॥ १७ ॥

(भागवत)

अर्थात्—सात सागरों वाली इस पृथवी के द्वीपों और वर्षों में भारत द्वीप सर्वाधिक पुण्यमय भूभाग है, क्योंकि जहाँ के लोग कृष्ण भगवान् के कल्याणप्रद पराक्रमों का संकीर्तन करते हैं।

निम्नलिखित श्लोकों का हिन्दी में भावार्थ लिखिए—

अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ १ ॥

यो धर्मशीलो जितमानरोषो विद्या विनीतो न परोपतापी ।
स्वदारतुष्टः पर-दार-वर्जितो न तस्य लोके भयमस्ति किञ्चित् ॥ २ ॥

मुदं विषादः शरदं हिमागमः तमो विवस्वान् सुकृतं कृतघ्नता ।
प्रियोपपत्तिः शुचमापदं नयः श्रियः समृद्धा अपि हन्ति दुर्नयः ॥ ३ ॥

मृगाः मृगैः संगमनुव्रजन्ति, गावश्च गोभिस्तुरगास्तुरगैः ।
मूर्खाश्च मूर्खैः सुधयः सुधीभिः, समान-शील-व्यसनेषु सख्यम् ॥ ४ ॥

विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ॥ ५ ॥

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री,
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलम् व्यसनिनः कृपणस्य सौख्यं,
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ ६ ॥

क्षते प्रहारा निपतन्त्यभीक्ष्णं धनक्षये वर्धते जाठराग्नि।
आपत्सु वैराणि समुद्भवन्ति छिद्रेष्वनर्था बहुलीभवन्ति ॥ ७ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीसमाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथ· प्रविचलन्ति पदं न धीराः ।८॥

कुदेश - मासाद्य कुतोऽर्थसञ्चयः कुपुत्रमासाद्य कुतो जलाञ्जलिः।
कुगेहिनीं प्राप्य गृहे कुतः सुखं कुशिष्यमाध्यापयतः कुतो यशः ॥ ९ ॥
व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृत्ताङ्गान्निशिता इवेषवः ॥१०॥

उचितमनुचितं वा कुर्वता कार्यजातं,
परिणतिरवधार्या यत्नतः पण्डितेन।
अतिरभसकृतानां कर्मणामविपत्त,
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥११॥

मान्धाता च महीपति कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती मुञ्ज त्वया यास्यति ॥१२॥

मनीषिण· सन्ति न ते हितैषिणो हितैषिण सन्ति न ते मनीषिणः।
सुहृच्च विद्वानपि दुर्लभो नृणां यथौषधं स्वादु हितं च दुर्लभम् ॥१३॥
आश्वास्य पर्वतकुलं तपनोष्णतप्त-
मुद्दामदावविधुराणि च काननानि।
नानानदीनदशतानि च पूरयित्वा
रिक्तोऽसि यज्जलद सैवतवोत्तमा श्रीः ॥१४॥

न वेत्ति यो यस्य गुणः प्रकर्षं स तं सदा निन्दति नाऽत्र चित्रम्।
यथा किराती करिकुम्भलब्धां मुक्तां परित्यज्य बिभर्ति गुञ्जाम् ॥१५॥

सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम्।
सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतो सुखम् ॥१६॥

दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः।
सर्पो दशति काले तु दुर्जनस्तु पदे पदे ॥१७॥

विद्वत्त्वं च नृपत्त्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥१८॥

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्याम् विहीनस्य दर्पणः किम् करिष्यति ॥१९॥

मातेव रक्षति पितेव हिते नियुङ्क्ते,
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं,
किं किं न साधयति कल्पलतेव विद्या ॥२०॥

उत्साह सम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मी स्वयं याति निवासहेतोः ॥२१॥

मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति।
अपि निर्वाणमायाति नानलो याति शीतताम् ॥२२॥

गच्छन्पिपीलिको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥२३॥

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषं परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा ॥२४॥

अनन्तशास्त्रं बहुलाश्च विद्या अल्पश्च कालो बहुविघ्नता च।
यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बु मध्यात् ॥२५॥

न जायते म्रियते वा कदाचिन् नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥२६॥

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥२७॥

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवापि तावत्किं भक्षणात्त्वं विरतो गरुत्मन्। ८॥

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।
नास्त्युद्यम समो बन्धु यं कृत्वा नावसीदति ॥२९॥

प्रसन्नतां या न गताभिषेकतस्तथा न मम्ले वनवास-दुःखतः।
मुखाम्बुजश्री रघुनन्दनस्य में सदास्तु सा मञ्जुल-मङ्गलप्रदा ॥३०॥

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं निजपृष्ठभागे।
अम्भो निधिर्वहति दुःसह वाडवाग्निम्
अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥३१॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः।
शेषं व्याधि वियोगदुःखसहितं सेवादिभिर्नीयते
जीवेवारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम्॥३२॥

अयममृत निधानं नायकोऽप्योषधीनां
शतभिषगनुयातः शम्भु मूर्धावतंसः।
विरहयति न चैनं राजयक्ष्मा शशाकं
हतविधिपरिपाकः केन वा लङ्घनीया ॥३३॥

एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृताः स्वार्थाविरोधेन ये।

तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते केन जानीमहे ॥३४॥

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततं याति वन्हिः ।

विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषणं सज्जनानाम् ॥३५॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्ध परार्द्ध भिन्ना छायेव मैत्री खल-सज्जनानाम् ॥३६॥

वयमिह परितुष्टा वल्कलैः त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषः ।

स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥३७।

प्राप्तव्मर्थं लभते मनुष्यः दैवोऽपि त लंघयितु न शक्यः ।
तस्माद् न शोचामि न विस्मयो मे यदस्मदीय नहि तत्परेषाम् ॥३८।

अम्भोजिनी वननिवास विलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।

न त्वस्य दुग्धजलभेद विधौ प्रसिद्धां
वैदग्ध्य कीर्तिमपहर्तुमसौ समर्थः ॥३९॥

यत्रापि कुत्रापि गता भवन्ति,
हंसा महीमण्डल-मण्डनाय ।

हानिस्तु तेषां हि सरोवराणां,
येषां मरालैः सह विप्रयोगः ॥४०॥

भुक्ता मृणाल पटली भवता निपिता—
न्यम्बूनि यत्र नलिनानि निषेवितानि ।

रे राजहंस ! वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ।४१।।

४२—गीर्भिर्गुरुणा परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ।१५।।

सरल अपठित-गद्यांश

मातृभूमिः

सर्वेषां जीवधारिणां एका जन्मभूमिः भवति, अपरा कर्मभूमिः इति प्रायः दृश्यते । परिस्थितिवशात् मनुष्यः कदापि एकस्मिन् स्थाने स्थातुं न शक्नोति । परन्तु कुत्र अपि सः तिष्ठेत् तस्य प्रेम जन्मभूमिः प्रति अवश्यमेव भवति । अस्मिन् विषये एकं शिक्षाप्रदं कथानकं अस्ति ।

एकदा गरुड़ेन भगवान् विष्णुः प्रार्थितः मह्यं अवकाशम् दीयताम् मम इच्छा गृह गमनस्य अस्ति । दीर्घकालात् मया अवकाशः न प्रार्थितः अद्य मदीया प्रार्थना स्वीकार्या भवद्भिः । विष्णुः कथितवान् भो गरुड़ ! अवकाशं गृहीत्वा किं करिष्यसि ? सर्वे प्राणिनः वैकुण्ठागमनस्य इच्छा कुर्वन्ति त्वं तत्र अवकाशस्य प्रार्थनां करोषि । गरुड़ेन आग्रहः कृत अद्य अहं अवश्यं एव अवकाशम् गृहीष्यामि यदि श्रीमतां अवकाशप्रदानस्य इच्छा नास्ति तर्हि अहं अद्यतः भवतां सेवां न करिष्यामि इति ।

इत्थं तस्य आग्रहं श्रुत्वा विष्णुना कथितम् । अस्तु, अद्य तुभ्यं अवकाशं ददामि, किन्तु मां अपि तत्र नय । यस्याः जन्मभूमेः दर्शनाय त्वं उत्सुकः

असि, सा कीदृशी अस्ति इति अहं अपि अवलोकिष्यामि । गरुडः अवकाशं प्राप्य प्रसन्नः भूत्वा वैकुण्ठवासिनं भगवन्तं विष्णुं पृष्ठे आरोप्य स्वं देशं प्रति प्रचलितः ।

तत्र गत्वा गरुड़ः विष्णुं कथितवान् इयं एव मदीया मातृभूमिः । विष्णुना दृष्टः गरुड़ः एकां वृक्षस्य शाखां आरुह्य स्थितः । ततः उड्डीय वृक्षस्य अन्यां शाखां अधिरोहति इत्थ कुर्वाणं गरुडं विष्णुः अपृच्छत् किं एषा त्वदीया 'मातृभूमिः' यत्र आगमनार्थं त्वं उत्कण्ठितः आसी, किं अत्र स्वर्ग तुल्यं सुखं भवितुं शक्नोति ? गरुडः कथयति—'जननीजन्म भूमिश्च स्वर्गादपि गरीयसी' इति सत्यम् । अत एव सुभाषितं केन कवि-कुल-दिवाकरेण प्रतिपादितम्—

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते न मरालस्य मानसं मानसं विना ॥

अनुवाद हिन्दी में—

सभी प्राणियों की एक जन्मभूमि होती है, और दूसरी कर्मभूमि, प्रायः ऐसा देखा जाता है । परिस्थिति वश वह कभी भी एक स्थान में नहीं रह सकता । वह कहीं भी रहे किन्तु उसका प्रेम जन्मभूमि के प्रति अवश्य होता है । इस विषय में एक कथा है ।

एक बार गरुड़ ने भगवान् विष्णु से प्रार्थना की कि मुझको अवकाश दीजिये मेरी घर जाने की इच्छा है, बहुत दिनों से मैंने छुट्टी नहीं मांगी आज मेरी प्रार्थना को स्वीकार कीजिए । विष्णु ने कहा गरुड़ ! तुम छुट्टी लेकर क्या करोगे ? सभी प्राणी वैकुण्ठ में रहने की इच्छा करते हैं तुम वहाँ छुट्टी माँग रहे हो । गरुड़ ने आग्रह किया कि आज मैं अवकाश अवश्य लूँगा यदि आपकी इच्छा छुट्टी देने की नहीं है तो मैं आज से आपकी सेवा नहीं करूँगा । इस प्रकार उसके आग्रह को सुनकर विष्णु ने कहा अच्छा आज तुमको छुट्टी देता हूँ किन्तु, मुझे भी वहाँ ले चलो जिस जन्मभूमि के दर्शनं

के लिए तुम उत्सुक हो वह कैसी है मैं भी देखूंगा। गरुड़ छुट्टी पाकर प्रसन्न हो भगवान को अपनी पीठ पर बैठ कर अपने देश को चल पड़ा।

वहाँ जाकर गरुड़ ने विष्णु से कहा, यह मेरी मातृभूमि है। विष्णु ने देखा गरुड़ एक पेड़ की डाल में बैठ गया, थोड़ी देर में उड़कर दूसरी डाल में बैठ गया। ऐसा करते हुए गरुड़ से विष्णु ने पूछा, क्या यही तुम्हारी मातृभूमि है? जहाँ आने के लिए तुम उत्कण्ठित थे? क्या यहाँ स्वर्ग के समान सुख हो सकता है? गरुड़ ने कहा–'माता और जन्मभूमि स्वर्ग से भी महान् होती हैं' यह सत्य है। इसलिए किसी कवि ने कहा भी है—

यद्यपि सभी सरोवरों में कमल खिले रहते हैं फिर भी राजहंस का चित्त मानसरोवर के सिवा और कहीं नहीं लगता।

दीपमालिका

सम्पूर्णवर्षमध्ये बहवः उत्सवाः भवन्ति, तेषु दीपमलिका अपि एकः उत्सवः अस्ति। अयं उत्सवः कार्तिकमासस्य कृष्णत्रयोदशीतः शुल्कपक्षस्य द्वितीयां तिथि यावत् चलति। एषु दिवसेषु प्रतिदिनस्य पृथक् पृथक उत्सवः भवति। प्रथमदिने धनवन्तरित्रयोदशी उत्सवः भवति, तस्मिन् दिने आयुर्वेदस्य भक्ताः भगवन्तं धन्वन्तरिं पूजयन्ति, हिन्दू संस्कृतेः उपासकाः अद्य यथाशक्ति स्वर्ण, रजत ताम्र. पीत्तल-पात्राणि क्रीणन्ति। द्वितीये दिने नरकचतुर्दश्यां यमराजस्य पूजा, हनुमतः जन्म महोत्सवः च भवति। तृतीये दिने जनाः रात्रौ महालक्ष्म्याः पूजनं सहस्रशः मालाकारान् दीपान् प्रज्वाल्य कुर्वन्ति, चतुर्थे दिने प्रातः गोवर्धनधारी-श्रीकृष्णस्य पूजनं भवति। पञ्चमे दिने यमद्वितीयायां भगिन्यः स्वान् स्वान् भ्रातृन् आहूय स्वगृहे भोजयन्ति। श्रूयते अद्य यमराजः अपि स्वभगिन्याः यमुनायाः गृहे भोजनाय गच्छति, अतएव अद्य मृतानां यम बाधा न भवति।

दीपमालिकायाः दिने पर्वतीयस्थानेषु प्रज्वालिताः असंख्यका प्रदीपाः पर्वतस्य उपरि रात्रौ अन्धकारतया रावणविरचितस्यद्रोणाचल पर्वतस्य इव कां अपि अपूर्वां सुरम्यां च शोभां प्रकटयन्ति। दीपमालिकादिने महालक्ष्म्याः

स्वागताय जनाः यथाशक्ति स्वानि गृहाणि अलंकृत्यं बन्धु-बान्धवानां गृहे मिष्टान्नस्य आदानं-प्रदानं कुर्वन्ति, येन जनानां हृदये पारस्परिकस्नेहभावः वर्धते। बालकाः अपि अमायां रात्रौ अपूर्वं प्रकाश दृष्ट्वा मिष्टान्नानि भुक्त्वा नवीनानि वस्त्राणि च परिधाय प्रसन्नतया कूर्दन्ति।

अद्य एव रात्रौ वणिक् जनाः गतवर्षस्य आयव्यय समाप्त कृत्वा लेखा-पत्राणि सम्पूज्य नूतन वर्षस्य व्यवसाय प्रारम्भं कुर्वन्ति। अद्यरात्रौ केचिन् जना द्यूतक्रीड़ामपि कुर्वन्ति। तेषां कथनं अस्ति यत अद्य अनया क्रीड़या भाग्य परीक्षा भवति। किन्तु एषः दुराचारः अस्ति यतः द्यूतेन भाग्यपरीक्षा न भवति।

अनुवाद हिन्दी में—

सम्पूर्ण वर्ष में अनेक उत्सव होते हैं उनमें दीपमालिका भी एक उत्सव है। यह उत्सव कार्तिक मास की कृष्ण त्रयादशी से लेकर शुक्ल पक्ष की द्वितीया तक चलता है। इन दिनों में हर एक दिन का अलग अलग उत्सव होता है। पहले दिन धनवन्वतरि त्रयोदशी उत्सव मनाया जाता है इसदिन आयुर्वेद के उपासक लोग भगवान् धनवन्तरि की पूजा करते हैं, हिंदू संस्कृति के उपासक आज यथाशक्ति सोने, चाँदी, ताँबा, पीतल के पात्र खरीदते हैं। दूसरे दिन नरक चतुर्दशी के दिन यमराज की पूजा और हनुमान का जन्म महोत्सव होता है। तीसरे दिन रात में लोग महालक्ष्मी का पूजन हजारों मालाकार दीपों को जलाकर करते हैं। चौथे दिन प्रातःकाल गोवर्धन धारी श्री कृष्ण की पूजा होती है। पाँचवे दिन यमद्वितीया को बहनें अपने-अपने भाइयों को बुलाकर अपने घर में भोजन कराती हैं। सुना जाता है आज यमराज भी अपनी बहन यमुना के घर भोजन के लिए जाते हैं इसीलिये आज के दिन मरने वालों को यम बाधा नहीं होती।

दीपमालिका के दिन पर्वतीय स्थानों में जलाये हुये असंख्य दीपक पहाड़ के ऊपर रात्रि में अन्धकार होने के कारण रावण के द्वारा विरचित द्रोणाचल

पर्वत के समान एक अपूर्व शोभा को प्रकट करते हैं। दीपमालिका के दिन महालक्ष्मी के स्वागत के लिये मनुष्य यथाशक्ति अपने घरों को सुशोभित करके बन्धु बान्धवों के घरों में मिष्ठान्न का लेन देन करते हैं जिससे मनुष्यों के हृदयों में पारस्परिक स्नेह बढ़ता है। बालक भी अमावस्या की रात में अपूर्व प्रकाश देखकर मिठाइयाँ खाकर नये वस्त्रों को धारण कर प्रसन्नता से उछलते हैं।

आज रात में व्यापारी वर्ग गतवर्ष के आय व्यय को समाप्त करके वही की पूजा करके नये साल के व्यापार को आरम्भ करते हैं। कुछ लोग आज रात में जुवा खेलते हैं उनका कहना है आज जुवा खेलने से भाग्य परीक्षा होती है, किन्तु यह दुराचार है जुवा से भाग्य परीक्षा नहीं होती है।

एकः आदर्श-अध्यापकः (An Ideal Teacher)

छात्रस्य जीवनं अध्यापकस्य अधिकारे भवति। सः छात्र यथा निर्मातुं इच्छति तथा एव रचयति, यथा कुम्भकारः आर्द्रमृत्तिकया यादृशं भाण्डं रचयितुं इच्छति तथैव रचयति। तत्र छात्रस्य अपि कर्तव्यविशेषाः भवन्ति येषां सहायतया सः अधिकां सफलतां शीघ्रं लभते। एषः सरलः मार्गः एनं सर्वे जानन्ति एव, किन्तु मूर्खान्, दुर्व्यसनशीलान् दुराचारपरायणान् छात्रान यदि कश्चित् अध्यापकः शिक्षां दत्वा सुयोग्यान् सद्व्यवहारपरायणान् कुर्यात् तर्हि सर्वे तं 'आदर्शः अध्यापकः' अयं इति कथयन्ति, कथयिष्यन्ति च। यूयं जानीथ एव 'पञ्चतन्त्र' पुस्तकस्य रचयिता 'पण्डितः विष्णुशर्मा' आसीत्। सः एकः 'आदर्शः अध्यापकः' इति वयं मन्यामहे। सः स्वबुद्धिबलेन विश्वासं कृत्वा राज्ञः समीपे सगर्वं प्रतिज्ञां अकरोत्, "यदि अहं भवतः कुबुद्धीन् चतुरः पुत्रान् षट्मासस्य अभ्यन्तरे नीतिशास्त्रे तथा अन्यासु अपि विद्यासु कुशलान् न करिष्यामि तर्हि भवान् मह्यं प्राणदण्डं ददातु।'

आदर्शअध्यापकः - विविधशास्त्राणां ज्ञानवान्, कुशलः, पवित्रः, अहंकार-निन्दा-ईर्ष्या-द्वेष क्रोधादिभिः रहितः, सहनशीलः शिष्यानुरागी च भवति ।

विद्या (Knowledge)

विद्यया युक्तः मनुष्य एव विद्वान् भवति । सा विद्या गुरुसेवया मिलति । विद्या मनुष्यस्य बहून् उपकारान् करोति ।

सुखस्य मूलं विद्या. अतः मनुष्येण विद्याध्ययनं कृत्वा तस्याः अध्यापनेन स्वाध्यायेन वा सदुपयोगः करणीयः नतु व्यर्थस्य विवादः करणीयः । लोके राज्ञः सम्मानं अधिकं विद्यायाः वा अस्मिन् विषये अनेकानि सुभाषितानि सन्ति ।

राजा तु स्वकीयशासनसीमायाः मध्ये एव प्रभाववान् भवति किन्तु विद्वान् पुरुषः सर्वत्र एव स्वविद्यायाः प्रभावेण पूजितः भवति । अतएव कथितम्—"को विदेशः सुविद्यानाम्" विद्वद्भ्यः स्वदेशस्य विदेशस्य च चिन्ता अपि न भवति । सरस्वत्याः कोषस्य आश्चर्यमयं धनम् यतः सर्वाणि धनानि व्ययकरणात् क्षीणतां प्राप्नुवन्ति, किन्तु विद्याधन वृद्धिं प्राप्नोति । अतः सर्वैः स्व जीवनस्य अभ्युदयाय विद्याध्यनं करणीयम् ।

परोपकारः (Benevolence)

गर्भात् दशमे मासि बालः जन्म गृह्णाति । मातु कृपया तस्य पालनं पोषणं च भवति । सः विद्यालये गत्वा अध्ययनं करोति । अध्ययनानन्तरं स्व आजीविकाया चिन्तां कुर्वन् कमपि एकं पथं अनुसरति । धनस्य उपार्जनं करोति, स्व कुटुम्बं पालयति, इत्थं आजीवनं स्वार्थपरतायां एव काक इव जीवनव्यतीतं करोति, उक्तमपि—"काकोऽपिजीवति, चिराय बलिं च भुंक्ते" । केवल निज उदरभरणस्य एव तस्मै चिन्ता भवति । एतादृक् जीवन सतां समाजे न आद्रीयते । सज्जनानां शरीरस्यशोभा परोपकारेण भवति नतु चन्दन माला-आभूषणादिभिः । यथा भर्तृहरिः कथयति–'विभाति कायः करुणापराणां, परो-

पकारैर्नतु चन्दनेन' । अन्यत् अपि पश्यन्तु – सूर्य-चन्द्र-पृथ्वी-जल-तेज-वायु आकाशादयः, भगवता परोपकाराय एव रचिताः । जडपदार्थाः अपि परोपकारस्य महत्त्वं जानन्ति अतएव ते प्रतिदिनं परोपकारे तत्पराः सन्ति ।

विद्यालयः (College)

विद्यायाः आलयः विद्यालयः । अनया परिभाषया ज्ञानं भवति यत् न जाने तत्र कियती विद्या भविष्यति । वर्तमाने अस्मिन् युगे शासनद्वारा स्वीकृतेषु विद्यालयेषु प्रायः सर्वेषां विषयाणां अध्यापनं भवति । तेषां मध्ये एकः 'अस्माकं विद्यालयः' अपि अस्ति तस्मिन् प्रत्येकस्य विषयस्य अध्यापनाय तस्य विषयस्य योग्यतम-अध्यापकस्य नियुक्तिः भवति । तस्य अन्वेषणाय अधिकारिवर्गः समाचारपत्रेषु सूचनां प्रकाशयित्वा सर्वत्र प्रेषयति । तां सूचनां पठित्वा प्रार्थनापत्राणि आयान्ति. तदनन्तरं साक्षात्कार-(इण्टरव्यू) करणाय अधिकारिणः आमन्त्रणपत्राणि प्रेषयन्ति । तत्र तिथिः निर्धारिता भवति तदनुसारं तस्यां तिथौ तस्य पदस्य अभिलाषिणः समायान्ति । तेषु यः योग्यतमः भवति त एव स्वीकुर्वन्ति अधिकारिणः, तत्पश्चात् सः छात्रान् अध्यापयति ।

प्रवेशसमये छात्राणां योग्यतायाः अपि परीक्षां कुर्वन्ति प्रधानाचार्यमहोदयाः । तेषु यः योग्यतमः भवति तस्मै एकवर्ष-पर्यन्त छात्रवृत्ति दीयते ।

सदाचारः (Character)

उचितः आहारः विहारः च सदाचारशब्दस्य अर्थः भवति । उचितस्य च का परिभाषा ? येन आहारेण, येन विहारेण वा शरीरस्य रस-रक्त-मांस-मेदा-अस्थि-मज्जा-शुक्रादि-धातूनां वृद्धिः भवतिः सः उचितः तद्भिन्नः अनुचितः । अन्येषां मते सज्जनानां व्यवहारः एव सदाचारः । तत्र ज्ञातव्यं भवति के सज्जनाः ? के च तेषां व्यवहाराः ? ये देवता-गौ-ब्राह्मण-गुरु-वृद्ध-सिद्ध अतिथि-आचार्याणां पूजकाः भवन्ति, समये हितं, मितं, मधुरं अर्थं च कथयन्ति, वैरं, परद्रव्यं, परस्त्रियं च न इच्छन्ति, असत्य

भाषणं न कुर्वन्ति, परदोषान् न गणयन्ति, शून्यं गृह न प्रविशन्ति, समयस्य दुरुपयोगं न कुर्वन्ति, नियमानां पालनं सम्यकतया कुर्वन्ति, तथा बाल, वृद्ध, लुब्ध, मूर्ख, नपुंसकैः सह मित्रतां, मद्य, द्यूत, वेश्या प्रसङ्ग रुचिं, अहंकारं, पापं, आलस्यं च न कुर्वन्ति, ते एव सज्जनाः नेतारः च भवन्ति।

संस्कृत भाषा (Sankrit Language)

एषा संस्कृत-भाषा 'देववाणी' इति कथ्यते। अस्याः विषये पण्डितानां बहुविधः विवादः प्रचलति। आवश्यकी इयं वार्ता यत् इयं संस्कृत भाषा जनतायाः व्यवहारस्य भाषा आसीत् न वा ? अस्मिन् विषये विदुषां मतद्वयम् अस्ति। केचित् कथयन्ति संस्कृतभाषा विदुषां भाषा आसीत्, अस्यां ग्रन्थानां रचना भवति स्म। प्राकृत, पाली, अपभ्रंश आदि भाषाः अशिक्षित जनतायाः सम्पर्क - भाषाः आसन्।

अत्यन्त प्राचीनग्रथेषु सर्वे स्त्री, दूत, प्रतिहारी आदि पात्राः प्राकृतभाषायां एव सम्भाषण कुर्वन्ति स्म। एतत् अतिरिक्तं महात्माबुद्धस्य उपदेशाः पाली तथा प्राकृत भाषायां अथवा संस्कृते एव प्रामाः भवन्ति। केवल साहित्य रचनायाः एव भाषा सस्कृतभाषा आसीत्। इद मतं आधुनिकपाश्चात्य विदुषां अस्ति। किन्तु कतिपयानां आधुनिक-अन्वेषकानां प्रबलमान्यता अस्ति यदा अशिक्षिता जनता अपि संस्कृते लेखन, भाषण, व्यवहारादिकं करोति स्म तदा तस्याः मातृभाषा एव संस्कृतं आसीत्। सत्यमेव केनापि कविना उक्तम्—

धन्योऽयं भारतो देशः धन्येयं सुरभारती।
तत्पूजकाः वयं धन्याः अहो धन्या परम्परा॥

—०—

* चतुर्थ चरण *

निबन्ध

(Essay)

विशेष:—निबन्ध लिखना एक कला है। इस कला में निपुणता प्राप्त करना अवश्य ही श्रम-साध्य है। सीमित समय और स्थान में निर्दिष्ट पंक्तियों में सरल-सुगम-सरस-सुन्दर-सुसंस्कृत भाषा में अपनी विचारधारा को प्रभावशाली ढंग से प्रस्तुत करना ही निबन्ध, प्रबन्ध एवं प्रस्ताव कहलाता है। गद्यात्मक रूप में लिखा जाने वाला यह कार्य निःसन्देह विद्वानों के लिये भी चुनौती है, जैसा कि कहा भी गया है 'गद्यं कवीनां निकषं वदन्ति।' निबन्ध लेखन की उपयोगिता की सर्वोत्कृष्टता इसी से सिद्ध है कि विभिन्न शिक्षा सचालन संस्थानों द्वारा उसे अपनी परीक्षाओं में किसी न किसी रूप में प्रमुखता दी गयी है। इस शैली के अभ्यास के बिना श्रेष्ठ वक्ता, लेखक तथा विचारक होना निश्चय ही असम्भव है। शैली भेद से निबन्धों के चार प्रकार हैं—

१—वर्णनात्मक (Narrative)

इसमें चक्षु आदि ज्ञानेन्द्रियों द्वारा अनुभूत—नगर, नदी-समुद्र, पर्वत एवं संयुक्त राष्ट्र संघ आदि संस्थाएं आती हैं।

२—विवरणात्मक (Descriptive)

इसमें कथा, घटना, यात्रा, युद्ध आदि तथा महापुरुषों का जीवन-वृत्त आता है।

३—व्याख्यात्मक (Explanatory)

इसमें परोपकार, देश प्रेम, ग्राम्य जीवन आदि अमूर्त विषयों का वर्णन किया जाता है।

४—विचारात्मक (Reflective)

इसमें सामाजिक, राजनैतिक, साहित्यिक तथा विवाद ग्रस्त विषयों का वर्णन होता है।

उपर्युक्त निबन्धों को लिखने से पूर्व लेखक के लिए साहित्यिक, प्राकृतिक अध्ययन के साथ विषयों का मनन एवं चिन्तन कर लेना आवश्यक है। इसके अनन्तर—विचार (Ideas), संयोजन (Arrangement) तथा व्यक्तिकरण (Expression) के आधार पर निबन्ध लिखने में प्रवृत्त होना चाहिए। यदि अपने विचारों को भूमिका (Introduction), तर्क-वितर्क मध्यभाग (Discussion) तथा उपसंहार (Conclusion) में विभाजित कर लेखक सुव्यवस्थित ढंग से रचना करेगा तो अवश्य उसे सफलता मिलेगी।

हमें विश्वास है अगर छात्रों ने इस पुस्तक के प्रथम, द्वितीय तथा तृतीय चरण का भली भाँति अध्ययन किया होगा तो उन्हें निबन्ध के विषय को परिभाषित करने (define), विभाजित करने (divide), क्रमबद्ध करने (arrange) और पल्लवन करने (expend) में पूर्ण सफलता मिलेगी।

निबन्धों का विभाजन इस प्रकार भी किया जाता है—

१—वर्णनात्मक (Descriptive)
२—ऐतिहासिक (Historical)
३—विचारात्मक (Reflective)
४—गुणात्मक (Virtuous)
५—भावात्मक (Emotional)

अहिंसा (Non Voilence)

इह जगति प्राणिनां परस्परसहयोगेन मित्रभावनया सौजन्येन च सुखं लभ्यते शान्तिश्च वर्द्धते । परस्परद्रोहेण हिंसया च सर्वनाशो भवति । अत एव अहिंसाधर्मस्य शास्त्रे परमं महत्त्वं प्रदर्शितमस्ति । अहिंसा नाम भूतद्रोहाभावः । अहिंसाव्रतिनां सर्वे मित्राणि भवन्ति शत्रुपक्षीया अपि नम्रीभूता भवन्ति । अहिंसया आत्मन सशुद्धिर्भवति । दूषणानि नश्यन्ति । अतएव भगवता मनुना धर्मपरिगणने अहिंसाया प्रथमं निर्देशः कृतोऽस्ति । अहिंसया धर्मार्थकाममोक्षप्राप्तिर्भवति । हिंस्रः स्वपापेन विहिंसितः खलः । साधुः समत्वेन भयाद् विमुच्यते इति हिंसावृत्तयः स्वयं नश्यन्ति । अहिंसाव्रतिनः संकटाद् विमुक्ता भवन्ति । अहिंसा सर्वदेशीयः सार्ववर्णिको व्यापको धर्मोऽस्ति । विश्वस्य सर्वभागेषु अहिंसाधर्मस्य समादरोऽस्ति ।

केनापि असद्व्यवहारेण यदि कस्यापि हृदये आघातो भवति चेत् सापि हिंसा एव मन्यते । परकीयशस्यभक्षणे परस्य हिंसा शास्त्रेण कथ्यते । अतएव एतादृशं मार्मिकमा घातजनकं कर्म न कर्तव्यम् येन जनानां कष्टं भवेत् इत्येवाहिंसायाः सूक्ष्मभावना । अत एव देवीभागवते व्यासेन सत्याहिंसयोः परस्परं विरोधे समायाते किमाश्रयणीयं सत्यमहिंसा वेति मीमांसायामुक्तम् 'सत्यं न सत्यं खलु यत्र हिंसा, दयान्वितं चानृतमेव सत्यम्' इति । अर्थात् येन सत्येन प्राणिनां हिंसा भवेत्, तादृशं सत्यमपि त्याज्यम्, परन्तु हिंसा न कर्तव्येति ।

योगशास्त्रे 'अहिंसा प्रतिष्ठायां तत्सन्निधौ वैरत्यागः' इत्युक्तम् । सिंहव्याघ्रादिहिंसकजन्तुव्याकुलेऽपि वने मनसा वचसा कर्मणा च अहिंसाव्रतिनां महात्मनां कुतश्चिदपि हिंसकाद् भयं न भवति । ऋषीणां समीपे हिंसाभावं परित्यज्य एकत्र स्थिता भवन्ति स्म । वन्याः पशवः पक्षिणश्च मुनिसन्निधौ निर्भयं चरन्ति स्म । मुनिभिः सह एकात्मभावनाऽसीत् । भगवत्या भवान्या

वाहनेन सिंहेन सह भगवतः शङ्करस्य नन्दीवृषः एकत्र मित्रभावेन चरति। नास्ति तत्र हिंस्यहिंसकभावना।

अतएव अहिंसायाः परिपालनेन सर्वत्र शान्तिरेव भवति।

यद्यपि धर्मधुरीणा रामकृष्णादयः संग्रामे हिंसां कृतवन्तः, परन्तु सत्याहिंसा-परिपालनपराणां मुनीनां संरक्षणाय हिंसापरायणानामाततायिनां दुष्टानां दूरी-करणाय च हिंसाया आश्रयमकुर्वन्। यदि कश्चिद् लुण्ठक आगत्य कस्यापि साधोः प्राणघाताय प्रवर्तेत, तदा तत्र हिंसकस्य हिंसनमहिंसाफलकम् भवति। प्रजासु शान्तिविघटकतत्त्वानां दूरीकरणाय यदि हिंसा क्रियते, तदा तत्र हिंसा न दोषाय भवति।

प्राणिनां रोगविमुक्तये संरक्षणाय चौषधिनिर्माणे बहूनां वनस्पतितृण-गुल्मलतादीनां विभिन्नजीवानां च हिंसनं भवति। तथापि तत्राहिंसा भावनैव प्रधाना भवति। प्रजारक्षणमेव प्रधानमुद्देश्यम्भवति।

अस्माकं देशस्य ऋषयो महर्षयोऽहिंसाधर्मस्य प्रचाराय बहूनि पुस्तकानि विरच्य समुपस्थापितवन्तः। देशस्य विभिन्नभागेषु परिभ्रम्याहिंसाप्रचाराय प्रयत्नमकुर्वन्। महात्मा बुद्धोऽहिंसाप्रचाराय देशानां परिभ्रमणमकरोत्। यत्र-तत्र स्वशिष्यांश्च प्राहिणोत्। महात्मा महावीरो जीवस्य विमुक्तयेऽहिंसामेव परमं साधनमुक्तवान्। तन्मतावलम्बिनः सर्वथा प्राणिहिंसां वर्जयन्ति। मार्गे क्षुद्रजन्तूनां पिपीलिकानामपि हिंसा न भवतु, तदर्थं मार्गस्य मार्जनं विधाय चलन्ति। रात्रौ कीटपतङ्गादीनां दीपशिखासु पतनेन हिंसाभयात् दीपप्रज्वालनं परित्यजन्ति। श्वासप्रश्वासवायुना च कस्यापि जीवस्य हिंसा न भवतु, तदर्थं पटखण्डमुपनासिकं धारयन्ति। अहो धन्यास्ते महात्मानो ये जीवदयया स्वयं महत् कष्टमनुभवन्ति।

अस्माकं देशस्य स्वतन्त्रतासंग्रामे महात्मा गान्धिमहानुभावा अहिंसा-बलात् वैदेशिकान् देशाद् बहिःकृत्य स्वतन्त्रतामलभन्त। खेदस्य विषयः सम्प्रति महात्मागान्धिनां मार्गानुसारं सत्याहिंसयोः परिपालनं न भवति।

सर्वहिंसानिवृत्ता महात्मानो धन्याः।

अहिंसाभावनार्थमात्मसंयमस्यातिमहत्त्वमस्ति । सत्सङ्गेनाहिंसाभावना समुदेति। वाल्मीकिः सत्सङ्गप्रभावेण दस्युकार्यं विहाय हिंसां परित्यज्य महर्षित्वम्प्राप । सर्वेषां धर्माणां मूलतत्त्वमहिंसैवास्ति । अतोऽहिंसायाः परिपालनं सर्वथा विधेयम्।

देशभक्तिः (Patriotism)

देश अस्माकमाधारभूमिः। आधारभूमिं विना किमपि वस्तु नोत्पद्यते न वर्द्धते च। अन्नानि, फलानि, औषधानि, जलानि, शीतलसुगन्धिवायवो जीवनोपयोगीनि अन्यानि वस्तूनि च देशत एव समुपलब्धानि भवन्ति। अतो जनानां देशं प्रति प्रेम स्वाभाविकं भवति। कोऽपि देशाभिमानी ज्ञानी देशस्य हानिं न सहते।

अस्माक भारतदेशः स्वर्गादपि गरीयान्। अस्मिन् देशे गङ्गा यमुना सरस्वती गोदावरी नर्मदा कमला गोमती कौशिकी प्रभृतयो नद्यः परमपुनीता भोगमोक्षप्रदा विभिन्नभागेषु प्रवहन्त्यो भारतीयानां गौरवं वर्द्धयन्ति। यासां जलानि अमृतमप्यधः कुर्वन्ति। अमृतपानेन पुनर्जन्म न गृह्णाति जीव, परमासां परमपूत पानीयं पीत्वा परमेश्वरपदवीं प्राप्नोति। अस्य देशस्य काशी प्रयाग विन्ध्याचल मथुरा वृन्दावनायोध्या रामेश्वर बदरिकाश्रम सोमनाथादि तीर्थानि भुवनानि पवित्रीकर्तुं भगवद्रूपाणि विलसन्ति।

अस्य देशस्य हिमाचल-विन्ध्याचल-नीलगिरि-प्रभृतयः पर्वताः स्वोन्नत्या रत्नागारत्वेन च भारतं गौरवान्वितं कुर्वन्ति।

हेमन्तशिशिरवसन्तग्रीष्म वर्षाशरदृतवः स्वस्वसमयमासाद्यदेशस्य प्रजाः रञ्जयन्ति।

सीताराम-राधाकृष्ण-गौरीशंकर-नृसिंह - वराह - वामनादीश्वरावतारभूमिश्यमेव भारतदेशः।

कश्यपाङ्गिरोभृगुवशिष्ठ - विश्वामित्र-कपिलगौतमकणाद - पराशरजैमिनि-वाल्मीकिव्यासपाणिनि-पतञ्जलि- कालिदास-विद्यापति - पक्षधर-शंकर - मण्डन-मण्डितोऽयमस्माकं देश. संसारस्य प्रणम्यतामुपयाति ।

वेदोपवेददर्शनोपनिषद्पुराण स्मृतिकाव्योद्गमस्थलीयं भारतभूमिः ।

अस्य देशस्य कीटाः शुकाः पक्षिणः पशवोऽपि वेदाभ्यास परायणाः भवन्ति अस्ति इयं धारणा अस्माकं देशभक्तानाम् ।

भगवद्भजनदत्तमानसाः योगनिष्ठास्त्यागतपोमूर्तयः बद्धसिद्धासनाः सनातनधर्मरक्षणनिपुणाःसिद्धा महात्मानो विलसन्ति ।

अस्मिन् देशे संस्कृत - हिन्दी - मैथिली-बंगला - मराठी-गुजराती-उड़िया आसामी-पञ्जाबी-तमिल-तेलगु-कन्नड प्रभृतयो विभिन्ना भाषा व्यवह्रियन्ते ।

एतादृशस्य भारतदेशस्य समुन्नतये देशवासिभिः सततं समुद्योगः कर्तव्यः ।

यदा यदा देशः प्रजापीडनपरैर्धर्मविघ्नकारिभिरसुरैराक्रान्तो भवति, तदा तदाऽनन्तकोटिब्रह्माण्डनायको जगदीश्वरः देशोद्धारार्थं विविधानि शरीराणि धारयति ।

इतः कियद् वर्षपूर्वं देशस्य पारतन्त्र्याद् विमुक्तये तिलक-गोखले-मालवीय-सुभाष-गान्धि-राजेन्द्र-नेहरू-प्रभृति नेतारो देशाभिमानिनश्छात्राश्च विविधानि कष्टान्यन्वभवन् सहस्रं जनाः स्वप्राणानपि ददुः ।

देशस्य लब्धस्वतन्त्रतायाः संरक्षणार्थं सर्वविधसमुन्नतये च देशवासिभिराबालवृद्धैः सावधानैर्दृढपरिकरैश्च स्थातव्यम् ।

देशस्य यस्मिन् कस्मिन्नपि भागे स्थितैर्जनैः स्वस्वकर्तव्यानि देशसेवा-बुद्धया सम्पादनीयानि । यदि कृषकः पूर्णेन परिश्रमेण कृषिं कुर्यात्, तदा धन-धान्यादिपूर्णो भवेदस्माकं देशः । यन्त्रविभागे, विद्युद्विभागे अध्यापनादि-विभागेषु च ये नियुक्ताः सन्ति, तैः पूर्णेन परिश्रमेण कार्याणि कर्तव्यानि । वैज्ञानिकैश्चदेशविकासबुद्धया अनुसन्धानं कर्तव्यम् । धन्योऽस्माकं देशः यस्य देवा यशो गायन्ति । धन्या-देशभक्ताः येषां मुखात् सदा वन्देमातरम् निःसरति ।

समाचारपत्रम् (News Paper)

मानवानां समुन्नतये सम्यग् विचारस्य सम्यग् ज्ञानस्य चावश्यकता भवति। यस्य यादृशं ज्ञानं भवति सः तदनुसारं समुन्नतये चेष्टते। ज्ञानसामग्रीषु समाचारपत्रं मुख्यं साधनमस्ति। समाचारपत्रद्वारा जनाः स्वगृहे एव देशानां विदेशानाञ्च विविधवस्तूनां ज्ञानं कुर्वन्ति। यथा बृहत्पण्यवीथिकायां विविधानि वस्तूनि क्रयविक्रयार्थं स्थापितानि भवन्ति, तेषु यस्मै यद् वस्तु रोचते, स तद् वस्तु गृह्णाति, तथैव समाचारपत्रेषु विविधाः समाचाराः प्रकाशिता भवन्ति। राजनैतिक - सामाजिक - व्यापारिकविभिन्नविषयाणां स्पष्टीकरणं भवति। विविध सेवाकार्याणां निर्वाहार्थं, वस्तूनां क्रयार्थं, प्रतियोगितासु भागग्रहणार्थं च विज्ञापनानि प्रकाशितानि भवन्ति।

सम्प्रति संघर्षमयेऽस्मिन् युगे सर्वे देशाः समुन्नतये स्वप्रतिष्ठार्थं च स्पर्द्धमानाः सन्ति। कस्मिन् देशे किं भवति, अस्माकं किं कर्तव्यम् अस्ति, कस्मिन् देशे कीदृशी राजनीतिः प्रचलति, केषां नेतृणां कीदृशी अभिरुचिरित्यादि विभिन्नविषयाणां सम्यग् ज्ञान समाचारपत्रतो भवति। समाचार पत्रेण शिक्षितानां स्वीययोग्यतानुसार जीविकान्वेषणे तत्प्राप्त्यर्थं चावसरस्य ज्ञानं भवति। योग्यव्यक्तीनां चयनं भवति। व्यापारिकवस्तूनां मूल्यादिपरिज्ञानं भवति। कस्मिन् स्थाने कस्य वस्तुन आवश्यकताऽस्ति इत्यादि परिज्ञान द्वारा व्यापारे सौलभ्यं भवति। समाचारपत्रेण वैज्ञानिकवस्तूनां परिज्ञानं भवति। यातायातादि-परिज्ञानाय समयनिर्देशो भवति। अतो जनानां समाचार पत्राणामध्ययने दिनानुदिनमभिरुचिवर्द्धत एव।

जनाः समाचारपत्रं विना कूपमण्डूका इव तिष्ठन्ति। जीवने भोजनं जलं वस्त्रं च यथा आवश्यकमस्ति तथैव समाचार पत्राध्ययनमपि जनानामावश्यकमस्ति।

समाचारपत्राणि विविधानि भवन्ति। दैनिकानि, साप्ताहिकानि, पाक्षिकाणि, मासिकानि त्रैमासिकानि च।

समाचार पत्राणि प्रायः सर्वासु भाषासु प्राकाश्यन्ते । विभिन्नेषु प्रान्तेषु, नगरेषु च एतावन्ति समाचारपत्राणि प्रकाश्यन्ते येषां नामानि गणयितु-मशक्यानि ।

समाचारपत्राणां प्रकाशनार्थं सर्वकारद्वारा आर्थिकमनुदानं प्राप्तं भवति ।

अतो देशस्य विभिन्नां परिस्थितिं, विभिन्न पर्वादीनां महत्त्वं, महापुरुषाणां चरित्रं, व्यावहारिकवस्तूनां च वैशिष्ट्यं ज्ञातुं समाचारपत्रं यथासम्भवमध्ये-तव्यमिति ।

देशाटनम् (Wandering through a ceuntry)

देशाटनं जनानां व्यावहारिक ज्ञानलाभाय मुख्यं साधनं भवति । ज्ञानं विना मानवा अन्धा इव तिष्ठन्ति । स्वस्य समाजस्य देशस्य च सर्वाङ्गीण-विकासाय विविध वस्तूनां विभिन्नसाधनानां च परिज्ञानमावश्यकं भवति ।

यद्यपि शिक्षालये शिक्षणप्रशिक्षणप्राप्त्या पुस्तकावलोकनेन समाचारपत्रै-र्दूरभाष (टेलीफोन) यन्त्रैराकाशवाणीप्रभृतिभिः साधनैर्ज्ञानं विकसति परन्तु पूर्णं व्यावहारिकं ज्ञानं देशभ्रमणं विना न भवति । तदर्थं विभिन्नस्थानानां परिभ्रमणमावश्यकं भवति । कस्य देशस्य कीदृशो व्यवहारः, कीदृशी नीतिः, केन सह कथं व्यवहर्तव्यमित्यादिव्यावहारिकज्ञानं देशाटनेन संप्राप्य परस्परमादान-प्रदानाभ्याम्, व्यापारसौलभ्येन, स्वस्य देशस्य समाजस्य च समुन्नतिः कर्तुं शक्यते । कानि चिद् वस्तूनि कुत्रचिदुपलभ्यन्ते, न तदन्यत्रोपलभ्यन्ते, देशाटनेन तत्परिज्ञाय तल्लाभाय यत्नः क्रियते । प्राप्तेषु तेषु वस्तुषु महाँल्लाभो भवति ।

विभिन्न नगरेषु वृहत् पुस्तकालयेषु एतादृशानि पुस्तकानि सन्ति, यानि-अन्यत्र नोपलभ्यन्ते, तत् स्थानस्थित्यैव तदवलोकनं कर्तुं शक्यते । देशा-टनमन्तरा जनो लाभान्वितो न भवितुं शक्नोति । विभिन्नसंस्कृतिसंसूचककलानां

परिदर्शनेन तत्तन्निर्माणकालिककलाभिर्वर्तमानकलाभिस्तुलनात्मकमध्ययनमपि देशाटनमन्तरा न भवितुमर्हति ।

विद्वांसो देशभ्रमणेन विभिन्न संस्कृतीनां सामञ्जस्यं स्थापयन्ति ।

चीनयात्री ह्वेनसाङ्गः भारतस्य परिभ्रमण विधाय तत्तत्स्थानीयशिल्पानां, कलानां, व्यवहारादीनां चाध्ययनं विधाय स्वलिखित पुस्तके तेषां सम्यगुल्लेखनं चकार येन सम्प्रति लोकानां कृते ऐतिहासिकाध्ययने तत्कालिकसामाजिककलाकौशलाचारसभ्यतासंस्कृतीनां परिज्ञानाय समधिकं साहाय्यं मिलति ।

पूर्वमशोकनामा सम्राट् सत्याहिंसाशान्तिस्थापनार्थं देशाटनमकरोत् । अहिंसाव्रती भगवान् बुद्धः-भगवान् महावीरस्तन्मतानुयायिनश्च स्वमतप्रचारार्थं देशस्य विदेशस्य च परिभ्रमणं चक्रुः । यत्प्रसादतोऽद्य भारतम् विश्वगुरुरिति कथ्यते । प्राचीन समये वैदेशिका भारतमागत्य स्वीयमध्ययनं कुर्वन्ति स्म । साम्प्रतमपि कुर्वन्ति । एतद्देशीया अपि गवेषणात्मकाध्ययनार्थं विदेशं जनाः गच्छन्ति ।

अस्माकं देशनेतारा महात्मागान्धिप्रभृतयो विदेशभ्रमणेन भारतीयानां दुःस्थितिमालोक्य तेषां स्वतन्त्रतार्थं समधिकान्दोलने समागताः । स्वकीयानि सर्वाणि कार्याणि विहाय देशस्य स्वतन्त्रतासंग्रामे एव निमग्ना जाताः । देशस्य प्रतिभागं क्रियासमभिव्याहारेण लोकान् जागरयामासुः। यत्प्रभावात् वैदेशिकाः अस्मभ्यं स्वातन्त्र्यं प्रदाय स्वदेशम् अगमन् । लब्धायां च स्वतन्त्रतायां विभिन्नदेशैः सह मित्रतार्थं तथा कस्मिन्देशे देशविकासकार्याणि केन प्रकारेण चलन्ति, कीदृशी योजनेत्यादि पर्यालोचनाय नेहरूप्रभृतयो रूसजापानामीरिकादिदेशानाम्परिभ्रमणमकुर्वन् ।

अद्यत्वे च प्रायः प्रतिदेशं विभिन्नदेशानां राजदूताः सन्ति । ते तत्तद्देशस्य व्यवहारं, परिस्थितिं, नीतिं च परिज्ञाय स्वदेशनेतॄन् परिज्ञापयन्ति । व्यापारिकादि सम्बन्धं च स्थापयन्ति ।

इत्थं दृश्यते देशानां परिभ्रमणं सर्वाङ्गीण-समुन्नतये महदावश्यकं भवति ।

सम्प्रति छात्राणामध्यापकानाञ्च कृते देशाटनद्वारा ज्ञानविज्ञान-विकासाय विश्वविद्यालयाः प्रान्तीयसर्वकारतः केन्द्रतश्च आर्थिकमनुदानं लभन्ते। येन प्रतिवर्षं छात्रा अध्यापकाश्च पर्य्यटन्ति एवं ज्ञानविज्ञानसम्वर्धनेन समाजस्य देशस्य च समुन्नतयेऽग्रसरा भवन्ति।

नीतिशास्त्रे च चातुर्य्यलाभार्थं देशाटनस्य महत्त्वं प्रदर्शितमस्ति।

देशाटनसमये स्वास्थ्यसरक्षणदृष्ट्या तत्तदृतुपरिधानीयानि सह नेतव्यानि। स्मारकपुस्तिका (नोटबुक) सह नेतव्या। विलक्षणवस्तूनां वैलक्षण्यं, प्रस्तरपट्टिकासु लिखितानां प्राचीनसस्कृतिकलाकौशलनिपुणताद्योतकानां वस्तूनां वृत्तं स्मारक पुस्तिकायां विलिख्य सावधानेन गवेषणात्मकमध्ययनं विधातव्यम्।

इत्थं देशाटनेन ज्ञानविज्ञानविकासो भवति। चातुर्य्यम् निर्भयत्वम् मित्रभावनाश्च वर्द्धन्ते। येन परस्परसहयोगेन समुन्नतिर्भवति। अतो देशाटनमावश्यकं कर्तव्यम्।

ग्रामोद्योगः (Rural Industry)

भारतं ग्रामप्रधानो देशः। जनसंख्याया अभिवृद्ध्या जनानां जीवनोपयोगि, जीविकासमस्या समुपस्थिताऽस्ति। यद्यपि स्वतन्त्रताप्राप्त्यन्तरं देशे विभिन्नानि विकासकार्याणि समभूवन् तथापि लोका आर्थिकदृष्ट्या स्वावलम्बिनो न सन्ति। देशे ग्रामीणक्षेत्रेषु लघूद्योगो मन्थरगत्या चलति। लघूद्योगस्य व्यापकरूपेण संचालनेन ग्रामीणाः स्वीयामावश्यकतां पूरयितुं दक्षा भविष्यन्ति। अर्थव्यवस्थाया विकासेऽभिवृद्धिर्जायेत, क्षेत्रीयसमुत्पन्न वस्तूनां समादरेण जनानां हार्दिकः समुत्साहो वर्द्धेत, जनानां जीविकार्थं परमुखापेक्षित्वं न भवेत्, एतदुद्देश्यमाश्रित्य विभिन्नप्रांतीयसर्वकारैः ग्रामोद्योगविकासाय खादीग्रामोद्योग समितयः संस्थापिताः। याः अधिकाधिकरूपेण ग्रामोद्योगकार्याणां विभिन्नग्राम्यक्षेत्रेषु संचालनेन जनानां

कार्यकरणस्यावसरं ददति । श्रमिकाणां समुचितावसरेऽपेक्षित पारिश्रमिक-प्रबन्धस्य, ग्रामीणोपभोक्तृणां कृते आवश्यकवस्तूनां पूर्तिकरणस्य, विभिन्नो द्योगानामाधुनिकवैज्ञानिकविधिना प्रशिक्षणस्य व्यवस्थां समितयः कारयन्ति । तदर्थं विभिन्नवर्गेभ्यः श्रमिकेभ्यो ऋणरूपेण अनुदानरूपेण चार्थिकसाहाय्यं कुर्वन्ति ।

योजनान्तर्गतखादीसूत्रस्यनिर्माणे वस्त्रनिर्माणादिकार्येषु च प्रशिक्षण-मम्बरप्रशिक्षणकेन्द्रेषु खादीविकासयोजनाकार्याणि च संचालयन्ति ।

ग्रामीणजनानां खाद्यान्नसम्बन्धिसमुद्योगस्याधिकं महत्त्वमस्ति । कृषिसमुद्योगानां प्रोत्साहनार्थं विभिन्नभागेषु सेवाकेन्द्राणि सन्ति, येषां संचालनार्थं विकासार्थं च सहस्रं सहकारिसमितयश्चलन्ति । यद्द्वारा कृषकेभ्यो अनुदानम्, स्वल्पव्याजेन ऋणं च प्राप्यते । विविध शिल्पकलानां संवर्द्धनाय विशेषतः स्त्रीसमाजस्य कार्यप्राप्तये हस्तशिल्पकार्येषु प्रोत्साहनं च दीयते । मृद्भाण्डनिर्माणोद्योगो यद्यपि प्राचीन परम्परातो ग्रामेषु चलति, तथापि तदर्थं च विशेषतो लाभाय यत्नः क्रियते ।

वस्तुतः कठिनपरिश्रमकर्तारः कृषकाः, शिल्पिनः, श्रमिकादयश्च देशोन्नतेः भाग्यविधातारः सन्ति, ये देशस्य समृद्धिं वर्धयन्ति ।

जापानदेशः ग्रामीणकुटीरोद्योगप्रभावत एव समृद्धिशाली वर्तते । अस्मद्देशे कुटीरोद्योगस्य विकासो न सन्तोषजनकोऽस्ति अपितु अपेक्षाकृत-मल्पमेवास्ति । अतो ग्राम्यक्षेत्रेषु एतदुद्योगान् प्रत्याकर्षणाय प्रभावकरी व्यवस्था करणीया ।

ग्रामीणकृषकाणां सविधे वर्षं यावत् कार्यं न भवति । यदि ते कृषेरवशिष्टं समयं कुटीरोद्योगसंचालने दद्युस्तदा उत्पादनादिवर्द्धनेन देशस्यार्थिक-प्रगतिः सुतरामेव भवेत् । अनेन कृषकाः निजार्थिकस्थितिञ्च सुदृढां कर्तुं समर्था-भवेयुः ।

ग्रामोद्योग विकासेन समाजस्यार्थिकी विषमता दूरीभविष्यति । अतो ग्रामीण कुटीरोद्योगस्य प्रोत्साहनं सर्वेषां कर्तव्यमस्ति ।

भारते ग्रामोद्योग-कार्यक्रमस्य संवर्द्धनाय पर्याप्तरूपेण समुपयुक्तप्रयोग-शालानामभावोऽस्ति। तदर्थं व्यापारिवर्गस्य स्वतन्त्ररूपेण सार्वजनिकजीवने सक्रियभागो ग्रहीतव्योऽस्ति । सामान्यजनताभिः सम्पर्कः स्थापनीयो भवेत् यतः इत्थं ग्रामीणक्षेत्रेषु व्यापारिकसंस्थान द्वारा ग्रामोद्योगस्य विकासो भवेत् ।

महात्मनां गान्धिमहोदयानामप्येष विचार आसीत् यत् भारतीयग्रामीणक्षेत्रस्य विकासेन भारतस्य विकासो भवेत् । अतएव तत्तत्क्षेत्रे जनताभिः स्वावश्यक-वस्तूनि स्वमेवोत्पादनीयानि । येन सर्वे स्वावलम्बिनः स्युः ।

खाद्य-समस्या (Food Problem)

सृष्टिकालादेव प्राणिनां शरीरपोषणार्थं भोजनस्यावश्यकता भवति । भोजनं विना कश्चिदपि प्राणी जीवितो न स्यात् । अतः शरीरसुरक्षार्थं प्राण-धारणार्थं च खाद्यसमस्यायाः समाधानमावश्यकं कर्तव्यं भवति । प्राचीनसमये लोकाभिवृद्धिरल्पा आसीत् । वनेषु विविधानि फलानि उपलभ्यन्ते स्म । गोसेवायाः सार्वभौमिकः प्रचार आसीत् । येन फलैर्दुग्धैश्च खाद्यसमस्यायाः बहुधा समाधानं भवति स्म । जनाश्च सन्तोषावलम्बिनो यदृच्छालाभसन्तुष्टा भवन्ति स्म ।

क्रमशः लोकानामुत्तरोतराभिवृद्ध्या वनानां च समुच्छेदात् गोसेवातो लोकानां विरागात् फलानां दुग्धानां च स्वल्पोत्पादनात् अन्नस्याधिकाधिकमपेक्षा समायाता । फलतः कृषिकार्यं जनानामनिवार्यं कर्तव्यमभवत् । पूर्वं ब्राह्मणा ऋषयो महर्षयश्च कृषिकार्याणि न कुर्वन्ति स्म । परन्तु तद् वंश्याः कृषिकार्ये सँल्लग्ना अभूवन् । इत्थं खाद्यसमस्यायाः समाधानार्थं कृषिकार्यस्याभिवृद्धये लोकाः समाधिकरुचयो बभूवुः । परन्तु समये समयेऽतिवृष्ट्यनावृष्टितो कृषिः यथानपेक्षितं साफल्यं न लभते । अन्नानामल्पतया जनानां महत्का-ठिन्यं भवति । अतएव देशनायकैः कृषिकार्याणां प्रगतये अनेका योजनाः समुपस्थापिताः । अतिवृष्ट्या नदीनां प्रबलप्रकोपात् सर्वाणि शस्यानि जलनिम-ग्नानि जायन्ते स्म । अतो नदीनियोजनस्यात्यावश्यकतामनुभूय तद्योजनायाः

प्राथम्यानुसारं बहूनां प्रमुखनदीनामुभयतटबन्धाः कारिताः । येन पूर्वापेक्षया देशेऽधिकशस्यवृद्धिरुत्तरोत्तरं जायते । परन्तु केवलं नदीनियोगेनैव खाद्यसमस्यायाः समुचितं समाधान न भवेदिति अनावृष्टितो जलवैकल्येन बहुषु प्रदेशेषु अन्नसंकटस्य दूरीकरणमत्यावश्यकं मन्वानैर्नेतृभिः सेचन-याजनामाश्रित्य बह्वयो जलनालिकाः खानिताः, नलकूपाः, वृहत्कूपाः, भूगर्भ-स्थितजलनिःस्सारण्यश्च यन्त्रिकाः अधिकाधिकं समायोजिताः । तेन पूर्वं यस्मिन् प्रदेशे जलदुर्लभतया शाका अपि नोत्पद्यन्ते स्म तत्राधुना निरन्तरसेचन-सहयोगात् कृषेर्महती प्रगतिर्जाता ।

परन्तु हनूमत्सुरसावदनवृद्धिरिव जनसंख्याखाद्यसमस्ययोरुत्तरोत्तर वृद्धया देशस्य समुन्नतिः संकटापन्नैव ।

यद्यपि सर्वकारद्वारा कृषि कार्याय सर्वतोऽधिकं महत्त्वं प्रदाय, प्रोन्नत-बीजाः, शस्याभिवृद्धिजनकविविधखादद्रव्याणि लोकेभ्यो दीयन्ते । तथा कृषेरावश्यकसाधन-समाधानार्थं ग्रामीणक्षेत्रेषु सहकारिसमितयः संघटिताः । यद्द्वारा लोकेभ्योऽल्पव्याजेन ऋणं दीयते । एवं भूबन्धकविभागतश्च क्षेत्र-कार्यार्थं ऋण प्राप्यते । वृहद्धल (टेक्टर) द्वारा वन्यक्षेत्राणां कर्षणं विधाय शस्योत्पादनाय महान् प्रयासश्चलति । देशस्य जनताश्च पूर्वापेक्षया सम्प्रति कृषिकार्येणऽधिकां रुचिं ददति । यस्मिन् भूभागे कियत्समयात्पूर्वं गोधू-मस्य नाममात्रमेवोत्पादनं भवति स्म तत्राधुना लोकानां महता समुत्साहेन समुचितप्रोन्नतबीजदानेन, सेचनेन च महती प्रगतिर्दरीदृश्यते । इति महान् हर्षविषयः ।

सञ्जातास्वपि प्रगतिषु देशः खाद्यसमस्यायां स्वावलम्बी नाभूत् विदेशा पेक्षया । अतएव एतद्विषये शिक्षाविशारदैः ध्यानं दातव्यमस्ति । विदेशेषु जापाने रूसामेरिकादौ च उच्चशिक्षाविशारदैर्जनैः कृषिकार्याणि क्रियन्ते । स्वहस्तेन सर्वाणि कार्याणि कर्तुं न लज्जन्ते । अत एव ते स्वावलम्बिनः सन्ति । अस्माकं देशे अन्यशिक्षितानां का कथा, कृषिस्नातका अपि क्षेत्रेषु

स्वहस्तेन कार्यं कर्तुं न प्रभवन्ति इति महान् खेदविषयः। अतो देशस्य खाद्य-समस्यानां समाधानार्थं शिक्षितवर्गाणां ध्यानमावश्यकमस्ति। येन वैज्ञानिक-पद्धत्या रासायनिकखादादिप्रयोगैश्च शस्याभिवृद्धिर्भवेत्।

देशे धार्मिकदृष्टया शस्यसम्पत्त्यभिवृद्धये सनातन-धर्मावलम्बिभिः समये समये यज्ञादिना· प्रकृतिः सन्तोष्टव्या अत एव गीतायां भगवतोक्तम् —

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।
अन्नाद् भवति पर्जन्यः यज्ञः कर्मसमुद्भवः। इति।

वर्षा-वर्णनम् (Discription of Rainfall)

वर्षाकालः समागतः। मदमत्तगज इव सजलमेघः समागतः। सर्वत्र विद्युत् द्योतते। अशनिशब्दो यत्र तत्र जायते। कामिजनः प्रसन्नो दृश्यते। क्वचित् नीलकमलवन्नीलैः क्वचिदञ्जनवत्कृष्णैः क्वचिदीषत्पीतैर्घनैराकाशं शोभते। तृषाकुलैश्चातककुलैर्जलं प्रयाचिता जलपूर्णा बहुधार-वर्षिणः श्रोत्रमनोभिरामा मेघाः प्रयान्ति। प्रभिन्नवैदूर्यमणिवत् श्यामतृणाङ्कुरैः समन्विता कन्दली-दलैर्विलसिता मही सुशोभते। मयूरा मेघगर्जनं श्रुत्वा स्वप्रियया सह नृत्यन्ति। नद्यश्चतुर्दिक्षु प्रविद्धवेगैः कलुषितैर्जलै तदद्रुमान् पातयन्त्यः पयोनिधिं प्रयान्ति।

विन्ध्यवनानि नूतनपल्लवयुतैर्द्रुमैर्हरिणीमुखक्षतैर्नवतृणांकुरैः चितानि शोभन्ते। रात्रावभिसारिकाः स्त्रियः मेघेन घनान्धकारीकृतरात्रिषु विद्यु-त्प्रभया पतिगृहमार्गं पश्यन्त्यो गच्छन्ति।

मेघानां भीमगर्जनैर्विद्युद्भिश्च भीतचेतसः स्त्रियः रात्रौ कृतापराधानपि प्रियान् न तर्जयन्ति। वृष्ट्या नवोदकं कीटरजस्तृणान्वितं सर्पवद्वक्र-गत्या चलितं सर्पाशंकया भयाकुलैर्भेकैर्नीरीक्षितं सम्प्रयाति। भृङ्गाः पद्मशून्यां नदीं विहाय प्रनृत्यतां मयूराणां नूतनपक्षेषु नूतन-कमलाशया प्रयान्ति। पर्वते

मेघसान्निध्यान्मयूरा नृत्यन्ति। कदम्ब-सर्जार्जुनकेतकी - पुष्पाणां सुगन्धैः सुवासितो वर्षाम्बुशीतलो वायुः प्रवासिनां मनांसि सोत्सुकानि करोति। नद्यः सोद्वेगेन प्रयान्ति। मेघाः वर्षन्ति। मत्तगजा गर्जन्ति। वनानि श्यामानि भवन्ति। मयूरा-नृत्यन्ति। वानरा गुफासु लीनाः सन्ति। स्त्रियो नवकेसर-केतकीकदम्बपुष्पमालया सुशोभिताः ककुभपुष्पैर्मनोनुकूलं कर्णभूषणानि रचयन्ति। अगरुमिश्रितचन्दनचर्चिताः कर्णभूषणीभूत - पुष्पसुगन्धैः सुरभित-केशपाशाः स्त्रियो मेघध्वनिं श्रुत्वा शीघ्रं गुरुग्रहात् प्रदोष एव शय्याग्रहं प्रयान्ति। नीलकमलवच्छ्यामैस्तोयनम्रैरिन्द्र-चापमण्डितैर्मन्दमन्दवायुभिर्मन्दं चलद्भिर्मेघैः पतिविरहाकुलानां प्रवासिनववधूनां चेतांस्यपह्रियन्ते। जातपुष्पैः कदम्बैः प्रसन्ना इव पवनचलितशाखैर्वृक्षैर्नृत्यन्तीव केतकीनां सूचिभिः हसिता इव नवसलिलनिषक्ता वनान्ताः शोभन्ते। वर्षाकालोऽयं वकुलमालया सुशोभितो यूथिका नवकुड्मलैः सुप्रसन्नो विकसितनवकदम्बैर्युतः समेषां मनांसि मोदयति। केतकीपुष्पाणां परागैश्चतुर्दिक् सुरभीभवति। वर्षा वर्णनमवलम्बय कविना उक्तमपि—

बहुगुणरमणीयः कामिनीचित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः।
जलदसमय एषः प्राणिनां प्राणभूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि॥

विश्वशान्तिः (World Peace)

प्राणिनः स्वभावतः सुखं दुःखाभावं च कामयन्ते। एतदर्थमेव सर्वं कार्य-कलापं कुर्वन्ति। नानाविधव्यवसायद्वारा धनोपार्जनं विधाय अन्नवस्त्र - भवन शिक्षणमनोरञ्जनादिसाधनैः सुखमनुभवन्ति।

परन्तु कस्यचित् सविधे लौकिकसुखसाधनानां सत्त्वेऽपि सुखानुभूतिर्न भवति। कश्चिच्च लौकिकसाधनानामभावेऽपि सुखी विचरति। तत्र

जिज्ञासोदेति लौकिकसामग्रीसत्त्वेऽपि सुखं कथं न जायते। तत्रैवमेव कथयितुं शक्यते, यत् सुखानुभूतये बाह्योपकरणातिरिक्तमपि कारणमस्ति, यदभावेन सुखानुभूतिर्न जायते। तत्किमलौकिककारणमिति जिज्ञासायां शान्तिरेव सर्व-सुखानां मूलं कारणमिति प्रतिभाति। अत एव भगवता श्रीकृष्णेन गीताया-मुक्तम् 'अशान्तस्य कुतः सुखम्' इति तत्र व्यष्टिशान्त्या समष्टिशान्तिः, समष्टिशान्त्या व्यष्टिशान्ति र्भवति परस्परमुभयोः सम्बन्धात्। अस्माकं शरीरस्य कश्चिदवयवो यदि रोगाक्रान्तो भवति तर्हि तत्प्रभावः सम्पूर्ण एव शरीरे भवति। अत एव विश्वशान्तयेऽस्माकं वेदाः, उपनिषदः विश्व-शान्तिं वेदयन्ति। अस्माकमिदं विचारणीयमस्ति यद् विश्वशान्तिः कथं भवेत्। विश्वशान्तये प्रथमं मानवानां हृदये एकात्मभावनाया आवश्यकता-ऽस्ति। विश्वस्मिन् ये मानवाः वाऽन्ये प्राणिनो सन्ति ते ममात्मस्वरूपा एव अहञ्च तेषामिति। येन सर्वोदयो भवेत् विश्वस्य कल्याणं भवेत् सैव वास्तविकी शान्तिः।

विश्ववन्धुत्वभावनयैव शान्तिर्भवेत्। मानवानां शिक्षाया अतीव महत्त्व-मस्ति। यादृशी शिक्षा प्राप्यते तदनुसारमेव आत्मनि संस्कारो जायते। अतः शिक्षाप्रणाल्यां विश्ववन्धुत्वभावनोत्पादकशास्त्राणां संनिवेश आवश्यकः। मानवानां यादृशी शिक्षा भवति तादृशी एव भावना अपि भवति। अतः शिक्षा-पद्धतौ वेदानामुपनिषदां च समावेश आवश्यकः। उपनिषत् प्रतिपादयति—

'ईशावास्यमिदं सर्वं यत्किञ्चिज् जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम्' इति॥

अर्थात् समस्तमेव जगत् ईश्वरेण-परमात्मना आच्छादितमस्ति, कस्यापि धनमन्यायेन न अपहरणीयम्। गीतायामपि भगवतोक्तम्—

सर्वभूतेषु चात्मानं, सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥

सम्प्रति भौतिक-विज्ञानस्य विध्वंसभयोत्पादकत्वेन सर्वे देशाः परस्परं शङ्कमानाः भीतिमापन्नाः सन्ति। अस्माकं देशनेतारो महात्मागान्धिः नेहरू

राजेन्द्रप्रसादादयो विश्वशान्तये लोकानां समक्षे सत्याहिंसामार्गाश्रयणस्य सन्देशं ददुः । अयं पन्था। सर्वश्रेयस्करः । सत्ये नास्ति भयं क्वचित् इति । अहिंसावादस्य प्रचारे सति आक्रमणं सर्वथा स्वयमेव अवरुद्धं स्यात् । महात्मा बुद्ध, सम्राट् अशोकः, अन्ये च सज्जनाः विश्वशान्तये सत्याहिंसाप्रचार मतिशयेन अकुर्वन् ।

यद्यपि सम्प्रति राष्ट्रसंघः सुरक्षापरिषच्च विश्वशान्तये चेष्टेते तथापि शान्तिस्थापना न दृश्यते । अतस्तदर्थं मानवानां हृदयपरिवर्तनस्यावश्यकता-ऽस्ति । आध्यात्मिकभावना जागरयितव्या अस्माभिः तदैव घृणा, द्वेषः, तुच्छभावनाश्च नश्येयुः ।

विश्वशान्तयेऽस्माकमृषीणामुद्घोषोऽस्ति—'सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेदिति' ।

सांप्रतमपि शंकराचार्य-करपात्रि-गङ्गेशानन्दादयो महात्मानो विश्व—शान्तये अस्माकं देशस्य विभिन्न भागेषु विश्वशान्तियज्ञान् कारयन्ति ।

वयं च विश्वशान्तये जगदीश्वरं प्रार्थयामहे यत् वयं यथावसरं कृतसंकल्पा भवेम, येन वसुधैव कुटुम्बकमिति सत्य भवेदिति ।

महात्मा गान्धिमहोदयः

अस्ति भारतस्य पश्चिमे भागे काठियावाड़ नामकं राज्यम् । तत्रासीद् वैश्यवंशावतंसो नीतिनिपुणः कर्मचन्दनामा कश्चिद् विपश्चित् । यः पोरबन्दर-नामके नगरे दीवानकार्यं करोति स्म । स स्वनामधन्यायां स्वधर्मपत्न्यां स्वेष्ट-देवताप्रसादात् १८६९ ई० वर्षे अक्टूबर मासस्य २ तारिकायां स्वमौरस-पुत्रमेकं लेभे । यस्य नाम मोहनचन्दकर्मचन्द्रगान्धी इति कारयामास । योऽग्रे स्वत्यागतपोबलेन राष्ट्रपिता महात्मागान्धीति संज्ञया विश्वविख्यातो बभूव ।

महात्मगान्धिनो माता पुतलीबाई स्वभावतो धर्मशीला, दानतत्परा, व्रतपरायणा, सत्यवादिनी, वैष्णवधर्मनिष्ठा आसीत् । इयं सदा वर्षतौ चतुरो मासान् यावत् चातुर्मास्यव्रतपालनतत्परा भवति स्म ।

मोहनचन्दगान्धिनो बाल्यकालः पोरबन्दरनगरे स्वपित्रा सह व्यतीतः । अनन्तरं पितुः पोरबन्दरतो राजकोटनगराय स्थानान्तरणे सति गान्धी तत्रैव राजकोटे) कस्यांचिद् ग्रामीणपाठशालायां प्राथमिक शिक्षार्थं छात्रीभूतः पञ्च वर्षाणि यावत् तत्रैव पठन्नासीत् ।

गान्धी अतीव विनयी, लज्जाशीलः, शिक्षकाज्ञाकारी पितृसेवापरायणो बालक आसीत् । अस्य न केनापि सह मित्रताऽसीत्, न च केनापि सह शत्रुता । छात्राणामध्ययनं कर्तव्यमिति सदा स्वाध्ययने पितृसेवायां तत्परस्तिष्ठति स्म । कियत् कालानन्तरं १८८५ ई० वर्षे गान्धिनः पिता परलोकमासादयामास । ततोऽध्ययने विघ्ने समुपस्थितेऽपि महात्मा महता समुत्साहेन स्वाध्याये तत्पर १८८७ ई० वर्षे प्रवेशिका (मैट्रिकक्युलेशन) परीक्षामुत्तीर्णो बभूव । तत्समये देशस्य परतन्त्रतयोच्चशिक्षाप्राप्त्यर्थं विदेशगमनमावश्यकमासीत् । अतो बैरिष्ट्रीशिक्षाप्राप्त्यर्थं स विलायतं गतः । १८९१ ई० वर्षे तत्परीक्षामुत्तीर्य्य स्वदेशे परावर्तत् । अनन्तरं बम्बई नगरे वाक्कीलतामारभत् ।

एतस्मिन् समये पोरबन्दरस्य कस्यचिद् व्यापारिणो व्यापारकार्यस्य विवाद—समाधानाय महात्मागान्धी अफ्रिकादेशं गतः । तत्र स्वाभिमानी गान्धी स्वदेशीयशिरस्त्राणं (पगड़ी) परिदधानो न्यायालये वाक्कीलतां कर्तुं गतः । तत्र गौराङ्गन्यायाधिपतिः भारतीयशिरस्त्राणमधः कर्तुमादिदेश गान्धिनम् । स्वदेशाभिमानी गान्धीमहोदय आदेशमिममसहमानो न्यायालयात् परावृतः, किन्तु शिरस्त्राणं नाधश्चकार । तेन मार्गे, याने, भोजनालये यत्र तत्र गान्धिनः समालोचना तिरस्कारश्चाभवत् । भारतीयानामन्येषामपि तत्रत्यानामपमानमसहमानो गान्धी तत्रैव आङ्गलानां विरोधे स्वाधिकारप्राप्तये च आन्दोलनमारब्धवान् । ततः स्वदेशमागत्य राजनीतौ प्रविष्टो बभूव । १९१४ ई० वर्षे विश्वयुद्धे गौराङ्गानां महत् साहाय्यं चकार । तैश्च विश्वयुद्ध-समाप्त्यनन्तरं भारताय स्वातन्त्र्यदानस्य वचनं दत्तमासीत् । परन्तु गौराङ्गाः लब्धेऽपि जये स्वातन्त्र्यं न ददुः । ततः १९१९ ई० वर्षे गौराङ्गानां विरोधे स स्वदेशे आन्दोलनमारभत । क्रमशः महात्मागान्धिमहोदयस्य सत्याग्रहेण

सम्पूर्णे देशे स्वतन्त्रताऽर्थं जनानां हृदये प्रबलभावाः जागरिताः। विहार-प्रान्तस्य चम्पारणमण्डले नीलक्षेत्रे कृषकोपरि गौराङ्गानामन्यायमसहमानस्त-द्विरोधे तीव्रमान्दोलनं कारयामास। तत्र डा० राजेन्द्रप्रसादेन तस्य साक्षात्कारो जातः। अन्ते महात्मा तत्र विजयी बभूव। इत्थं देशस्य स्वतन्त्रतार्थं समायातेषु महान्दोलनेषु न जाने कियद्वारं कारागारस्य तीव्रामपि यातनां सहमानः स्वतन्त्रतायुद्धतो न विरराम।

१९१९ ई० वर्षे जाँलियाबाग नामके स्थाने गौराङ्गानां कठोरदमनेन देशीयानां स्वाधिकारप्राप्तये महात्मागान्धी देशवासिनामान्दोलनं कर्त्तु-माह्वानं चकार। तदा सम्पूर्णे देशे व्यापकमान्दोलनं प्रवृत्तम्। इत्थं देश-व्याप्यान्दोलने विस्मिताः शासकाः कांग्रेसीयमन्त्रिमण्डलं १९३७ ई० वर्षे स्थापितं चक्रुः।

१९४२ ई० वर्षे भारतीयानां स्वतन्त्रतार्थं संजाते निवेदने शासकवर्गः महात्मगान्धिप्रभृतिनेतॄन् कारागारे स्थापयामास। तदा जनाः गान्धिनेहरू-प्रभृतीनां संकेतेन देशव्यापि तम् अत्युग्रमान्दोलनं चक्रुः। यद्यपि तदान्दोलनं शमयितुं गौराङ्गशासकाः देशवासिजनेभ्यः कठोरदण्डं, गृह-दाहं, धनक्षय-करणैः तीव्रां यातनां ददुः। परन्तु जनता 'कार्यं वा साधयेयम् देहं वा पातयेय-मिति' निश्चयं कुर्वाणा स्वलक्ष्यप्राप्तये दृढसंकल्पा बभूव। अन्ततो गत्वा १९४७ ई० वर्षे भारतं स्वतन्त्रं कारयामास। यातेऽपि स्वातन्त्र्ये गौराङ्गानां कूटनीत्या हिन्दुमुस्लिमयोः परस्परं गृहयुद्धमारब्धम्। यत्र तत्र हिन्दूनां हिंसनं कर्तनं च अभवत्। नोवखाली नामके स्थाने हिन्दूनां महान् संहारो बभूव। तत्र महात्मागान्धी-अहिंसा-सत्यबलेन शान्तिं स्थापयामास। देशे विदेशे च शान्ति-स्थापनाय गान्धिमहोदयेन सत्याहिंसाधर्मयोः प्रचारः आश्रितः। 'रघुपति राघव राजाराम पतित पावन सीताराम, ईश्वर अल्ला तेरे नाम सबको सन्मति दे भगवान्' इति स्तुत्या सार्वजनिकसमारोहे महात्मा गान्धि-महोदयः प्रतिदिनं प्रचारं करोति स्म।

प्रतिदिनानुसारम् १९४८ ई० वर्षे जनवरी मासस्य त्रिंशत्तारिकायां

सार्वजनिकप्रार्थनासभां गन्तुं दिल्लीस्थ - बिरलामन्दिरे गच्छन् नाथूराम गोडसे इति नाम्ना केनापि आततायिना पिस्तौल गुलिकात्रयेण हृदि देशे वारत्रयं विद्धोऽपि सीताराम, हे राम इति भगवन्नामोच्चारणं कुर्वन् स भगवत्-सायुज्यमाप।

महात्मागान्धिनः समाधिः दिल्लीनगरे यमुनानदीतटे राजघट्टे वर्तते। तत् स्थानं दर्शनीयं तीर्थीभूतमस्ति। देशीया विदेशीयाश्च जनास्तत्रागत्य पुष्प-माल्यार्पणं कुर्वन्ति।

महात्मागान्धी सर्वोदयवादी आसीत्। दलितवर्गाणां शोषणं तस्मै न रोचते स्म। हरिजनसमुद्धाराय तेषामतीव प्रेमासीत्। सार्वजनिकसेवार्थां स्वयं प्रवृत्तो भवति स्म। स्वावलम्बनार्थं स स्वयं तकुचक्रं (चरखा) चालयति स्म। स्वदेशीय-वस्त्र परिधानेन ग्रामोद्योग-कुटीरोद्योग-विकासेन च देशः स्वावलम्बी भवेत् इति तस्य उद्घोष आसीत्। महात्मागान्धी, स्वजीवनस्य अध्ययन कालेऽपि मिथ्या व्यवहारम् कदापि नाकरोत्। धन्योऽयं देशः, यस्मिन् महात्मा-गान्धी सदृशः पावनः सत्याहिंसाव्रती महापुरुषो बभूव।

श्रीलालबहादुरशास्त्री

भारतस्य भूतपूर्वप्रधानमन्त्रिणः श्रीलालबहादुरशास्त्रिणो जन्म १९०४ ई० वर्षे अक्टूबरमासस्य द्वितारिकायां वाराणसीमण्डले मुगलसरायनगरेऽभवत्। अस्य बाल्यावस्थायामेव अस्य पिता शारदप्रसादः परलोकं गतः।

श्रीलालबहादुरशास्त्रिणः प्रारम्भिकं शिक्षणं वाराणस्यां हरिश्चन्द्रपाटशालायामभवत्। क्रमशः संस्कृतस्य हिन्द्या आङ्गलभाषायाः च अध्ययनं कृत्वा ई० १९२१ वर्षे महात्मागान्धिन आह्वाने भारतस्य स्वतन्त्रता-संग्रामेऽयं सम्मिलतो बभूव। अनवरतं देशस्य विभिन्नभागेषु सभानां आयोजनं, जनतायाः संघटनं च चकार। आन्दोलनक्रमेऽयं बहुधा आङ्गलसर्वकारेण कारागारे निक्षिप्तः।

श्रीलालवहादुरशास्त्री सप्तवर्षाणि यावत् प्रयागनगरपालिकासमितेः सदस्य आसीत्। १९३० ई० तः १९३५ ई० पर्यन्तं प्रयागमण्डल (जिला) कांग्रेस समित्येरध्यक्षपदमलंचकार।

१९३७ ई० वर्षे उत्तरप्रदेशस्य कांग्रेससमितेर्महामन्त्री बभूव। अनन्तरं विधानसभासदस्यत्वेन निर्वाचितः।

१९५१ ई० वर्षे श्रीलालवहादुरशास्त्री लोकसभायाः सदस्यो बभूव। १९५२ धूमयान (रेल) विभागस्य मन्त्रिपदमलंचकार।

१९५६ ई० वर्षे राष्ट्रीयकांग्रसनिर्वाचनप्रमुखो बभूव। १९५८ ई० वर्षेऽयं वाणिज्यविभागस्य मन्त्रित्वेन नियुक्तः।

१९६१ वर्षे पञ्चनद (पञ्जाब) प्रदेशे अकालीदलस्य महान्दोलनम् प्रवृत्तम्। श्रीलालवहादुर शास्त्री स्वनीतिकौशलेन सुजनतया सौहार्देन च तदान्दोलनं शान्तं चकार। नेपाल-भारतयोः कतिपयविवादग्रस्तविषयाणां शान्त्या समाधानमकरोत्। उभयोर्देशयोः परस्परं सामञ्जस्य मैत्रीं च समस्थापयत्।

अस्मिन्नेवावसरे पण्डितजवाहरलालनेहरू अस्वस्थो जातः। श्रीलालवहादुर शास्त्री १९६४ वर्षे श्रीनेहरूमहोदयस्याग्रहेण निर्विभागीयमन्त्रिपदे नियुक्तः।

१९६४ ई० वर्षे मई मासस्य २७ तिथौ प्रधानमन्त्रिश्रीजवाहरलालस्य देहावसानमभवत्। कांग्रेससदस्यैः श्रीलालबहादुरशास्त्री प्रधानमन्त्रिपदे नियुक्तः।

एतस्मिन्नेव समये पाकिस्तानदेशेन भारतस्य भूभागे आक्रमण कृतम्। क्रमशो युद्ध प्रवृत्तः महान् नरसंहारो जातः। श्रीलालवहादुरशास्त्रिणो नीतिनैपुण्येन साहसेन च भयभीतः पाकिस्तानः युद्धाद् विरराम।

भारत—पाकिस्तानयोः शान्तिपूर्वकं सकलविवादविषयाणां समाधानार्थं रूसदेशस्य प्रधानमन्त्रिणः साद्ये तासकन्दनगरे भारतस्य प्रधानमन्त्रिणः पाकिस्तानस्य राष्ट्रपतेश्च पारस्परिकशान्तिसन्धिविचारणार्थं एकं सम्मेलन

मायोजितमभवत् । श्रीलालबहादुरशास्त्री समारोहे भागं ग्रहीतुं गतः । उभय-देशयोर्नेतॄणां परस्परविचारानन्तरं संयुक्तनिर्णयपत्रे कोशिजिनमहोदयानां च साक्षिरूपेण हस्ताक्षरम् सम्पन्नम् । सर्वे नेतारः-प्रसन्नाः बभूवुः ।

अघटितघटनापटीयस्या देवमायायाश्चरित्रं को जानीयात् । अस्माकं प्रिय-नेता शान्तिदूतः श्रीलालबहादुरशास्त्री तत्र तासकन्दनगरे रात्रौ १ वादनेऽक-स्माद् हृदयपीडामन्वभवत् । चिकित्सकानां समुपस्थितावपि अस्मान् सशोकी-कुर्वन् तासकन्दनगरे एव भूलोकं विहाय परलोकं गतः ।

दैवी विचित्रा गतिः । को जानीयात् यत् श्रीलालबहादुर शास्त्री इत्थं स्वदेशस्य रक्षार्थं स्वप्राणाहुतिं दद्यात् इति ।

श्रीलालबहादुरशास्त्रिणः शवं भारतमानीय दिल्लीनगर-यमुनातटे अग्नि-संस्कारः कारितः । तत्समये पाकिस्तानस्य राष्ट्रपतिः, रूसस्य प्रधानमन्त्री समुप-स्थितः संवेदनया श्रीशास्त्रिपरिवारसदस्येभ्यः सन्तोषं ददौ ।

श्रीलालबहादुरशास्त्री जन्मना यद्यपि साधारणपरिवारस्य सदस्य आसीत् परन्तु स्वकर्मणा, त्यागेन, अदम्यसाहनेन च विश्वस्य महापुरुषो बभूव ।

भारतः सदैव श्रीलालबहादुरशास्त्रिणं तथा तस्य रहस्पूर्णां मृत्युं स्मरेत् ।

महामना मदनमोहनमालवीयः

पं० मदनमोहनमालवीयः अस्माकं देशस्य महापुरुषेषु अन्यतम आसीत् । मालवीयो देशसेवार्थमाजीवन संलग्न आसीत् ।

अस्य महापुरुषस्य जन्म १८६१ ई० वर्षे दिसम्बरमासस्य पञ्चविंशति-तमतिथौ प्रयागे समभवत् । अस्य प्रारम्भिकमध्ययनं स्वजन्मभूमौ प्रयागे एवाभवत् अनन्तरं क्रमशः एफ० ए० परीक्षामुत्तीर्य कलकत्ता विश्वविद्यालयतो बी० ए० परीक्षामुत्तीर्णवान् ।

अध्ययनसमाप्त्यनन्तरं एकस्मिन् विद्यालयेऽध्यापनकार्यमारब्धवान् । ततो वाक्कीलता (वकालत) परीक्षामुत्तीर्य तत् कार्यमारब्धवान् ।

महामनामालवीयः संस्कृतेः संस्कृतस्य च महाविद्वान् तथा सनातनधर्मावलम्बी आस्तिकश्चासीत् । हिन्दुधर्मे च तस्य महती श्रद्धाऽसीत् ।

१८८५ ई० वर्षे कलकत्तानगरे कांग्रेससम्मेलने स्वकीयभाषणेन सर्वान् प्रत्याकर्षयामास । तत्र तेन राज्ञो राजपालसिंहस्य परिचयो जातः । तेन स्वकीयदैनिकपत्रस्य हिन्दुस्तानस्य सम्पादकत्वेन मालवीयो बहुमानं नियुक्तः । क्रमशः सम्पादनकार्यं सुचारुतया सम्पाद्य १८९१ ई० वर्षे तत्कार्यं विहाय प्रयागे वाक्कीलतां समारभत ।

मालवीयो देशस्य स्वातन्त्र्यार्थं सदैव तत्परः आसीत् । कांग्रेस संस्थायाः अध्यक्षतां स्वीकृतवान् । मालवीयस्य व्याख्यानम् चित्ताकर्षकं प्रभावोत्पादकं चासीत् । हिन्दु समाजस्य समुन्नतये हिन्दूमहासभायाः स्थापनां समकरोत् । वारत्रयं स तस्याः अध्यक्षपदे निर्वाचितः अभवत् । अछूतोद्धाराय तस्य महान् प्रयास आसीत् । हिन्दी भाषायाः प्रचाराय महोद्योगं चकार ।

मालवीयस्य त्यागस्य तपसश्च: फलस्वरूपो हिन्दूविश्वविद्यालयः शिक्षाक्षेत्रे जगत्प्रसिद्धोऽस्ति । यत्र देशस्य राजानो महाराजा: श्रेष्ठिनोऽन्ये च दातारो दानेन विभिन्नानि विद्यालयभवनानि छात्रावासादीनि च निरमापयन् । दानरूपेण प्राप्ताः कोटिशः मुद्राः विश्वविद्यालीयकोषे राशीकृताः सन्ति । हिन्दूविश्वविद्यालये देशस्य भारतेतरदेशानां च छात्रा विभिन्नविद्याः प्राप्नुवन्ति। इत्थं महामना हिन्दुविश्वविद्यालयं संस्थाप्य भारतस्य गौरवंसमुज्ज्वलं चकार ।

शिक्षाक्षेत्रे, समाजसेवायां, देशसेवायां च स्वकीयं जीवनं समर्पितवान् । कतिधा देशस्य स्वतन्त्रता-संग्रामे कारागार-यातनां च समुपभुक्तवान् ।

महामना महान् दयालुः, परोपकारतत्परः परमोदारो महापुरुष आसीत । कार्यगौरवाद् व्यस्ततायामपि प्रत्यहं भागवतस्य महाभारतस्य वा यथासम्भवमेकाध्यायं पठति स्म ।

महामना प्रयागक्षेत्रे कुम्भसम्मेलनावसरे अनेकवारं धर्मोत्सवं कारयामास ।

मालवीयः आङ्गलशासनकाले हरिद्वारे ब्रह्मकुण्डस्योपरिभागतो वृहद्धारा-मादाय अन्यस्मिन क्षेत्रे नेतुं वैदेशिकशासनस्य आयोजनमासीत् । येन हरिद्वारे गंगाया अविच्छिन्ना ध रा प्रवाहिता न स्यात् । तत्र दरभङ्गानरेश-रामेश्वरसिंहमहानुभावस्य अन्येषां च राज्ञां सनातनधर्मानुरागिणां चासहयोगेन गंगाधारायाः अवरोध-निरोधार्थं आन्दोलनं विधाय गङ्गायाः अविच्छिनां पूर्ववद्धारां समचालयत् ।

मालवीयस्य ग्रामसुधारार्थम् उपदिष्टेषु वचनेषु केचिन् निम्नलिखिताः सन्ति । यथा—

ग्रामे ग्रामे सभा कार्या ग्रामे ग्रामे कथा शुभा ।
पाठशाला मल्लशाला प्रतिपर्वं महोत्सवः ।
अनाथा विधवा रक्ष्या मन्दिराणि तथा च गौः ।
धर्म्यं संगठनं कृत्वा देयं दानं च तद्धितम् ।।

महामना १९४६ वर्षे नवम्बरमासस्य १२ त्रयोदशतिथौ पार्थिवशरीरं विहाय शिवसायुज्यमासवान् ।

डा० सम्पूर्णानन्दः

डाक्टर सम्पूर्णानन्दस्य जन्म काशीनगरे १९८० ई० वर्षे जनवरी मासस्य प्रथमतिथावभवत् । अस्य पिता श्रीविजयानन्द अतीव धार्मिकः परोपकारी चासीत् । तस्य संस्कारः सम्पूर्णानन्दे समायातः । संम्पूर्णानन्दस्य शिक्षणं काश्यामभूत् । संस्कृत साहित्यस्य दर्शन - वेद-शास्त्र-राजनीत्यादीनामध्ययनं विधाय सः प्रयागे विशिष्टशिक्षार्थं स्वनामाङ्कनमकारयत् । तत्र बी० एस० सी० तथा एल० टी० परीक्षामुत्तीर्णवान् । छात्रजीवनानन्तरं इन्दौरनगरे महा-विद्यालयस्य विज्ञानविषयस्याध्यापको बभूव । अनन्तरं वृन्दावने प्रेममहाविद्या-लयेऽध्यापयामास । ततः काशीं समागत्य तत्रत्य विद्यापीठेऽध्यापनं चकार । एतस्मिन्नेव समये महात्मागान्धिनो नेतृत्वे संचालिते आन्दोलने भागं गृहीत्वा

निरन्तरं स्वतन्त्रतासंग्रामे संलग्नो बभूव । स्वतन्त्रताप्राप्त्यनन्तरम् उत्तरप्रदेशस्य शिक्षामन्त्रिपदमलंचकार । कियत्काले व्यतीते मुख्यमन्त्रिपदमनेन स्वीकृतम् । तदनन्तरं राजस्थानराज्यस्य राज्यपालपदमलङ्कृतवान् ।

डा० सम्पूर्णानन्दस्य व्यक्तित्वं सर्वतोमुखीनम् आसीत् । सः कुशलराजनीतिज्ञः दार्शनिकः साहित्यकारश्चासीत् । विज्ञानक्षेत्रे तस्य महती रुचिरपि आसीत् ।

राजनीतिककार्येषु व्यस्तोऽपि स. साहित्यनिर्माणे विशेषाभिरुचिमभिदधौ । तेन दार्शनिक विषयमारभ्य सामाजिकविषयेष्वपि ग्रन्थनिर्माणमकारि । तेन निम्नाङ्किताः ग्रन्थाः लिखिता –चीन की राज्यक्रान्ति, मिश्र की राज्यक्रान्ति, सम्राट हर्षवर्द्धन, अन्तर्राष्ट्राय विधान, राजनीति, देशबन्धु चितरंजन दास, महात्मागान्धी, गणेश, आर्यों का आदि देश, चिद्विलास, भारत के देशी राष्ट्र, ब्राह्मण सावधान हो, पृथिवी से सप्तर्षिमण्डल, चेतसिंह और काशी का विद्रोह ।

अनेन 'जीवन और साहित्य' नामके निबन्धे साहित्यस्य कलायाः सम्बन्धः सर्वहिताय सर्वसुखाय चेति प्रतिपादितः ।

डा० सम्पूर्णानन्दस्य भाषा संस्कृतगर्भिता भवति । तस्य भाषायां संस्कृतोद्भवशब्दानां विशेषेण प्रयोगोऽस्ति । अनेन महानुभागेन एव वाराणसेय संस्कृत विश्वविद्यालयस्य स्थापना कृता ।

डा० सम्पूर्णानन्दो राजनीतिक्षेत्रे साहित्यिकक्षेत्रे च समानरूपेण ख्यातोऽस्ति ।

अस्य महापुरुषस्य जीवनस्य सिद्धान्तमेवासीत् —

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

साहित्यिक निबन्ध

उपमा कालिदासस्य

कविकुलशिरोमणेः कालिदासस्य काव्येषु माधुर्यस्य, पदलालित्यस्य, भाव, स्वाभाविकतायाः,प्रकृतिचित्रणस्य,रीतेः सन्निवेशः सम्यग् अस्ति । नीतेः, धर्मस्य सनातनमर्यादादीनां च हृदयग्राहि प्रतिपादनमस्ति । परन्तु उपमालङ्कारस्य विशेषतश्चमत्कारजनकत्वेन प्राधान्यात् 'उपमा कालिदासस्य' इति सूक्तिः प्रसिद्धाऽस्ति । कालिदासस्य ग्रन्थेषु उपमालङ्कारस्य प्रचुरतराः प्रयोगाः सन्ति । रघुवंशकाव्यस्य मङ्गलश्लोकं विरचयन् प्रथममुपमालंकारमेव दर्शयति कविः ।

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ ॥

यथा वाचः (शब्दस्य) अर्थस्य च परस्परं तादात्म्यमस्ति तथैव पार्वत्याः परमेश्वरस्य च परस्परं तादात्म्यमस्तीति उपमां कविः दर्शयति ।

राज्ञो दिलीपस्य धर्मपत्न्याः सुदक्षिणाया वर्णनं करोति कविः । यथा—

तस्य दाक्षिण्यरूपेण नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥

अत्र सुदक्षिणायां दक्षिणा सादृश्यं प्रदर्शितमस्ति ।

राज्ञो दिलीपस्य पुत्रप्रतिबन्धकीभूत जन्मान्तरीयं दुरदृष्टं वसिष्ठो ध्यानेन पश्यति तस्य वर्णनं कवि करोति—

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥

महर्षेर्वसिष्ठस्य कामधेनोर्नन्दिन्या वर्णनं कविः करोति —

ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्॥

नन्दिन्याः संरक्षणकाले गां वर्णयति—

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम्॥

सुदक्षिणा दिलीपयोर्मध्यगता नन्दिनी कथं सुशोभिता तत्र कथयति कविः—

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या॥

सुदक्षिणायाः शरीरदौर्बल्यवर्णने—

शरीरशापादसमग्रभूषणा मुखेन साऽलक्षत लोध्रपाण्डुना।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी॥

अत्र स्वल्पभूषणवत्या सुदक्षिणाया अल्पतारकायुक्तया रात्र्या उपमानत्वम्।

कुमारसम्भवकाव्ये भगवत्या पार्वत्या हिमालयः कथं विभूषित इति तद् विषये कविः कथयति—

प्रभामहत्या शिखयेव दीपः त्रिमार्गयेव त्रिदिवस्य मार्गः।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च॥

पुनः कवि कथयति—

तां हंसमालाः शरदीव गंगा महौषधिं नक्तमिवात्मभासः।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः॥

भारवेरर्थगौरवम्

विद्वन्मूर्द्धन्यः कविशिरोमणिर्भारविः संस्कृतसाहित्यस्य प्रसिद्धो महाकवि-रासीत्। अयं दाक्षिणात्यो ब्राह्मणः राज्ञो विष्णुमित्रस्य सभापण्डितः आसीत्। बाल्यावस्थात एवायं महाप्रतिभासम्पन्नः आसीत्।

अयं षष्ठशताब्द्या उत्तरार्द्धे स्वजन्मना भारतभुवं समलंकृतवान्। अयं राजनीतिशास्त्रस्य विशिष्टो विद्वानासीत्। सस्कृतकाव्येषु किरातार्जुनीयकाव्यस्य विशिष्टं स्थानमस्ति। अस्मिन् ग्रन्थे द्रौपदी-भीम-युधिष्ठिरोक्तिभिः राजनीतेः सम्यग् विवेचनं कृतमस्ति। भारवेः काव्येऽर्थगौरवं प्रसिद्धमस्ति। अत एव 'भारवेरर्थगौरवमिति' प्राचीना सूक्तिरस्ति वास्तविकं तद्ग्रन्थे अधिकार्थ-गौरवमालोक्यते। यथा—

राज्ञो दुर्योधनस्य राज्यकार्यं विज्ञातुं गुप्तचरत्वे नियुक्तः कश्चिद् वनेचरः सर्ववृत्तान्तं विज्ञाय युधिष्ठिरं कथयति—

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधमण्डलं भुवः।
स चिन्तयत्येव भियस्त्वद्वेष्यती रहोदुरन्ता बलवद्विरोधिता॥

\+ \+ \+ \+

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नतानतः सुदुस्सहान् मन्त्रपदादिवोरगः॥

कीदृशमर्थगौरवमस्ति अत्र—विक्रमशब्देन पराक्रमस्य, विपक्षी गरुड़ः तस्य क्रमः इत्याद्यर्थः। तवाभिधानात् इत्यत्र = तश्च वश्चेति नामैकदेशा नामग्रहणेन गृह्यन्ते इति तार्क्ष्यः वासुकिश्च बोध्येते इत्थम् अर्थगौरवं स्फुटं प्रतिभाति।

× × × ×

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः।
स्वविधेयपदेषु दक्षता नियतिं लोक इवानुरुध्यते ॥

सिद्धेः पञ्चानामङ्गानां निर्णायिका प्रभुशक्त्युत्पादिका नीतिः कर्तव्यपथेषु लोके दक्षताम् उत्साहमपेक्षत इति भावार्थः। अत्र कृतपञ्चाङ्गविनिर्णयः इति पदेन 'सहायाः साधनोपायाः विभागो देशकालयोः विनिपातप्रतीकारः। सिद्धिः पञ्चाङ्गमिष्यते। अत्र अर्थगौरवम् स्पष्टमेवास्ति। एवम्—

अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा।
स सदा फलशालिनीं क्रियां शरदं लोक इवाभिवर्द्धते ॥

तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः।
हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा ॥

तथा च— सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

अर्थगौरवेण सह अन्येऽपि गुणाः अस्य कवेः रचनायां सन्ति। उक्तमपि—

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥

नैषधे पद-लालित्यम्

नैषधमहाकाव्यम् संस्कृत काव्येषु सुप्रसिद्धं ग्रन्थरत्नमस्ति। अस्य महाकाव्यस्य रचयिता श्रीहर्षः द्वादशशताब्द्या उत्तरार्द्धे जन्मना भारतभुवमलंचकार। श्रीहर्षस्य पि.ा 'हीरः' महापण्डित आसीत्। माता च मामल्लदेवी तपः पूता सत्यपरायणा चासीत्।

कान्यकुब्जेश्वरः जयचन्द्रनामा नरपतिः श्रीहर्षस्य आश्रयदाता स्वराजधान्यामेनं ररक्ष। श्रीहर्षेण दश ग्रन्था निर्मिताः यथा—

(१) नैषधीयचरितम्, (२) स्थैर्यविचारप्रकरणम्, (३) विजयप्रशस्तिः, (४) खण्डनखण्डखाद्यम्, (५) गौडोर्वीशप्रशस्तिः,

(६) अर्णववर्णनम् (७) छन्दः प्रशस्तिः (८) शिवशक्तिसिद्धिः (६) नवसाहसाङ्कचरितम् (१०) ईश्वराभिसन्धिः ।

एषु द्वावेव ग्रन्थौ सम्प्रति समुपलभ्यमानौ भवतः। नैषधीयचरितम् खण्डनखण्डखाद्यश्च । तत्र खण्डनखण्डखाद्यम् वेदान्तस्य सुप्रसिद्धो ग्रन्थः ।

नैषधीयचरिते द्वाविंशतिसर्गाः सन्ति । अस्मिन् नलदमयन्त्योः प्रेमोपाख्यानमस्ति । नलः कस्मिंश्चित् सरसि एकं स्वर्णहंसमवालोकयत् एवं त गृह्णातिस्म । हंसो विकलीभूय राजान कथयति – "मदेकपुत्रा जननी-जरातुरा नवप्रसूति वंरटा तपस्विनी । गतिस्तयोरेषजनस्तमर्दयन्नहो विधेस्वां करुणारुणद्धिनो" इत्यादि । •करुणार्द्रो राजा तं झटिति मुमोच । हंसः प्रसन्नो भूत्वा राजानं दमयन्ती चरित श्रावयति । तस्याः सौन्दर्य्यं वर्णयति । सा विदर्भदेशाधिपते राज्ञो भीमकस्य कन्याऽस्ति कुण्डिनपुरे च निवसति । तव योग्या साऽस्तीति सर्वं समवर्णयत् । राजानं समाश्वासयन् ततो हंस· कुण्डिनपुरीं गच्छति । तत्र दमयन्तीसमक्षे समुपस्थितो भवति । दमयन्ती तं हंसं परिग्रहीतुं चेष्टते । हंसस्तया सह वार्तां करोति तथा क्रमशो नलस्य चरितं वर्णयति ।

दमयन्ती प्रसन्ना भवति, स्वयं च नलस्य प्रशंसां करोति । स्वकीय पाणिग्रहणाय नलं स्वसन्देशं प्रापयितुं हंसं प्रेषयति ।

हंसो दमयन्त्या नलं प्रति समभिलाषां विज्ञाय दमयन्ती संवादं गृहीत्वा नलसमीपं गच्छति । नलश्च हंसमुखात् दमयन्तीविवोहोत्कण्ठां श्रुत्वा प्रसन्नो भवति ।

तदनन्तरं दमयन्ती स्वमातरं स्वाभिलाषां समवेदयत् । राजा भीमकश्च दमयन्त्या नलस्नेहं विज्ञाय तस्याः स्वयंवरार्थं राज्ञां समीपमामन्त्रणं प्रेषयामास।

स्वर्गलोके इन्द्रयमकुवेरादयो देवाः दमयन्तीस्वयंवरसम्वादं नारदमुखाद् विज्ञाय स्वदूतं प्रेषयामासुः । परन्तु दमयन्त्याः नलं प्रति हार्दिकं प्रेम विज्ञाय ते त्यक्ताशाः बभूवुः । स्वयम्वरे राजानःसमागताः । तत्र चत्वारो देवा-इन्द्राग्नि-वरुणयमाः -नलरूपधारिणः, एकः वास्तविको नलश्चासीत् । दमयन्ती सर्वान् देवान् संस्तुत्य नलं वरयामास ।

दमयन्त्या सह विवाहानन्तरं नलः सप्ताहं यावत् तत्र स्थितः। ततो स्वराजधानीमाजगाम । इति नलदमयन्तीसदुपाख्यानमस्मिन् महाकाव्ये परमेण कौशलेन रमणीयसौन्दर्येण कविर्वर्णयामास ।

नैषधमहाकाव्यस्य 'नैषधे पदलालित्यम्' इति प्राचीना सूक्तिः प्रसिद्धाऽस्ति । तद्यथा—

अधीतिबोधाश्चरणप्रचारणैर्दशाचतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान् कुतस्स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ।

\+ + + +

यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिमा ।
तदेव गत्वा पतिता सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ॥

\+ + + +

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥

\+ + + +

दमयन्त्या वर्णनावसरे कविः कथयति—

अधरं खलु बिम्बनामकं फलमस्मादितिभव्यमन्वयम् ।
लभतेऽधरबिम्बमित्यदः पदमस्या रदनच्छदं वदत् ॥

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिमा ॥

इत्यादिषु उत्प्रेक्षाकाव्यलिङ्गालङ्कारादिसहैव पद-लालित्यं विशदमस्ति ।

माघे सन्ति त्रयो गुणाः

कविपुङ्गवो माघः सप्तमशतकस्योत्तरार्द्धे गुर्जरप्रान्तस्य भीननाल नामके ग्रामे विद्वन्मूर्धन्यस्य दत्तकस्य शर्मणो पुत्ररत्नत्वेन जन्म लेभे।

अस्य पिता परोपकारपरायणो दानशीलो महापण्डितो धनधान्यालङ्कृतश्चासीत्। अत एव माघोऽपि दानिशिरोमणिरासीदिति श्रूयते।

महाकवेर्माघस्य शिशुपालवधनामकं काव्यं संस्कृतेऽस्त्युत्तमं काव्यरत्नमस्ति। अस्मिन् काव्ये-मुनिपुङ्गवो नारदः भगवतः श्रीकृष्णस्य द्वारकानगरमागच्छति। तत्रोभयोः परस्परमालापो भवति। ततो नारदः शिशुपालस्य वधाय भगवन्तं निवेदयति। भगवान् श्रीकृष्णचन्द्रो नारदोक्तिं संश्रुत्योद्धवशौरिभ्यां युधिष्ठिरस्य राजसूययज्ञस्य शिशुपालवधस्य चोपस्थितौ किमधुना प्रथमं कर्तव्यमिति मन्त्रयति। ततो युधिष्ठिरस्य राजसूययज्ञसम्पादनार्थं श्रीकृष्णः इन्द्रप्रस्थं प्रतिष्ठते। तन्मार्गे रैवतकपर्वतस्य वर्णनं भवति। क्रमशो वसन्तादिऋतूनां वर्णनं कृत्वा भगवतः स्वीयानुचरैः सह वनविहारलीलावर्णनं, जलविहारवर्णनं चोत्पाद्य प्रदोषप्रत्यूषादिवर्णनानन्तरराजसूययज्ञसम्पादनस्य वर्णनं करोति। ततः शिशुपालेन सह युद्धवर्णनं करोति। अन्ते च शिशुपालस्य वधः वर्ण्यते।

अस्मिन् काव्ये यमक-अनुप्रास-समुच्चय-समासोक्ति-अतिशयोक्त्युपमादिसदलङ्काराणां भूरिशः कविना प्रयोगाः कृताः सन्ति। अतएव

उपमा कालिदासस्य,
भारवेरर्थगौरवम्।
नैषधे पदलालित्यं,
माघे सन्ति त्रयो गुणाः॥

इति प्राचीनकथन श्रूयते। दृश्यते अस्मिन् ग्रन्थे उपमालङ्कारस्य सन्निवेशो यथा—

अध्यासामासुरुत्तुङ्गहेमपीठानि यान्यमी।
तैरूहे केसरिक्रान्तत्रिकूटशिखरोपमा॥

स्वयं प्रणमतेऽल्पेऽपि परवायायावुपेयुषी ।
निदर्शनमसाराणा लघुर्बहुतृणं नरः ॥

\+ + +

भारतीमाहितभरामथानुद्धतमुद्धवः ।
तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम् ॥

\+ + +

अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निवन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥

\+ + +

जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ।
यतो वृहत्पार्वणचन्द्रचारु तस्यातपत्रं विभराम्बभूवे ॥
इत्थं माघः स्वकाव्ये उपमालङ्कारस्य बहुशः समावेशं कृतवानस्ति ।
शिशुपालवधे अर्थ-गौरवम् यथा—

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः ॥

\+ + +

षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ।
ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम् ॥

\+ + +

सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥

\+ + +

सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये ।
तत्रानिशं निषण्णास्ते जानते जातु न श्रमम् ॥

अत्र सर्वत्र नीतिशास्त्रीयवस्तूनां संक्षिप्तशब्दैः समावेशं कृत्वा कविरर्थ-गौरवं बहुधा दर्शितवान्। पदलालित्यं यथा—

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोहरैः ।

\+ + +

मधुरया मधुवोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

इति कविः स्वकाव्ये 'माघे सन्ति त्रयो गुणाः' इति सूक्तिं सत्यापयामास । यावत्चन्द्र दिवाकरौ महाकाव्यमिदं लोके अध्येषिष्येतेति ।

वाणी बाणो बभूव

'कादम्बरी' नामकं संस्कृतगद्यकाव्यम् जगति परमां प्रसिद्धिं प्राप्य संस्कृत-साहित्यस्य गौरवं प्रकटयति । अस्य काव्यस्य रचयिता बाणभट्टः सरस्वतीरूप एवासीत् ।

बाणभट्टः स्वजन्मना वात्स्यायनगोत्रमलंचकार । पूर्वं तद्वंशे कुवेरनामा कश्चिद् द्विज आसीत् । सः विहारप्रान्ते शोणनदीतटवर्तिनि प्रीतिकूटनामके नगरे प्रतिवसतिस्म । कुवेरो वेदवेदाङ्गानां महापण्डित आसीत् । सततं वेदवेदाङ्गा-नामध्यापने संल्लग्नः समयं यापयति स्म । तद्गृहावलम्बिपिञ्जरवर्तिशुकसारिका-दयोऽपि अभ्यस्तवेदा आसन् । ब्रह्मचारिणः शुक सारिकाकृताशुद्धिपारिग्रह-णवः सततं सशङ्कमधीयानास्तिष्ठन्ति स्म ।

अध्ययनाध्यापनेन सहैव कर्मरीत्या यजनकार्येषु तस्य महती ख्यातिरासीत् । सततं यज्ञीयधूमैः पवित्रवायवस्तत्क्षेत्रं पावयन्ति स्म ।

कुवेरस्य कनिष्ठपुत्रोऽर्थपतिरासीत् । अर्थपतेश्चित्रभानुः, चित्रभानोः पुत्रो बाणो बभूव ।

दैवी विचित्रा गतिरिति बाणस्याल्पीयस्येव वयसि मातापितरौ दिवंगतौ। बाणो बाल्यावस्थायां देशाटनादौ समयं यापयन् लब्धसंसारिकानुभवे श्रीहर्ष-राजधान्यां समागतः। बाणस्य प्रतिभया प्रभावितः श्रीहर्ष एनं तत्र रक्षयामास। साहित्यसृजने बाणस्य प्रतिभा विलक्षणाऽसीत्। यस्य प्रतिफलं कादम्बरी संस्कृत गद्यकाव्यं जगति प्रसिद्धमस्ति। ततो बाणः क्रमशः साहित्यरचनायां संल्लग्नो बभूव। हर्षचरितनामक आख्यायिकात्मको ग्रन्थो बाणभट्टस्य कल्पनाप्रतिभां प्रकटयति। एतदतिरिक्तौ द्वौ नाटकग्रन्थौ बाणभट्टलिखितावुपलभ्येते। १ पार्वती परिणयः २ मुकुटताडिकश्च। पार्वती-परिणये भगवत्याः पार्वत्या वैवाहिकी पवित्रतमाकथाऽस्ति।

बाणभट्टस्य कादम्बरी गद्यकाव्येषु अत्युत्तमो ग्रन्थोऽस्तीति सर्वविदितमस्ति। एतस्मिन् काव्ये महाराजशूद्रकस्य, सौम्यतापसहारीतस्य, ज्ञानवृद्धस्य जावालेः, नरपतेस्तारापीडस्य, व्यवहारकुशलशुकनाशस्य, तपस्विनीमहाश्वेतायाः, कमनीय कलेवरायाः कादम्बर्याश्च वर्णनं चेतसि समानन्दोल्लासं समुत्पादयति।

उपमोत्प्रेक्षा विरोधाभासश्लेषपरिसंख्यादिसदलङ्काराणां चमत्कारजनकं समावेशं विलोक्य केषां न चित्तमानन्दसागरे मग्नं भवति।

विन्ध्याटवीवर्णनं कीदृशमाश्चर्यजनकमस्ति। महर्षिजावालेराश्रमस्य वर्णने शान्तिं सजीवां कविर्दर्शयति।

बाणभट्टस्य शैली गद्यकवीनामादर्शतामाप्नोति। समासबहुलमोजोगुण-मण्डितं प्रभावोत्पादकं गद्यमस्ति।

विरहवर्णनावसरे लघुप्रसादयुतं वाक्यं कविः प्रयुङ्क्ते। परन्तु राजवैभवस्य प्रकृते रमणीयतायाश्चित्रणावसरे दीर्घसमासमलङ्कारमण्डितं वाक्यं प्रयुङ्क्ते। इत्थं गद्यशैल्यामद्भुतं सामञ्जस्यमस्ति।

बाणस्य सूक्ष्मा निरीक्षणशक्तिः, चमत्कृतवर्णनप्रणाली विलक्षणा वर्तते। अतएव बाणःकविसम्राट् कथ्यते।

प्रकृति-पुत्री शकुन्तला

शकुन्तला राजर्षेर्विश्वामित्रस्य पुत्री आसीत्। अस्या माता मेनका नाम काचिद् देवाङ्गना आसीत्। बाल्यावस्थायामेवेयं मातापितृभ्यां त्यक्ता केनचित् 'शकुन्तेन' (पक्षिणा) रक्षिता, अतएव अस्या नाम 'शकुन्तला' इति बभूव।

महर्षेः कण्वस्य केनचित् छात्रेणेयमाश्रममानीता। एतां परमसुन्दरीमवलोक्य जातकरुणो महर्षिः कण्वः स्वपुत्रीं मन्वानः परिपालयामास। परमसुशीला शुद्धहृदया बाला दिने दिने वर्द्धमाना कण्वस्य मुदं ततान।

वनपादपलतादीनां संसेचने परिष्करणेऽस्या बालाया स्वाभाविकी प्रवृत्तिरासीत्। कस्यापि पुष्पस्य समुद्गमे इयं तदुत्सवं मन्यमाना आसीत्।

मृगस्य मुखे कदाचिद् कुशसूचिकातो व्रण जाते इङ्गुदीतैलेन सिञ्चति स्म। आश्रमस्था मृगाः पक्षिणः शकुन्तलाया भ्रातरो भगिन्य इव परिपालिता भवन्ति स्म।

राजा दुष्यन्त एतां स्वसखीसहितां विलोक्य कथयति 'एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयोदातुमितएवाभिवर्तन्ते'।

अनसूया च कथयति—'हला शकुन्तले ! त्वत्तोऽपि तातकण्वस्य आश्रमवृक्षकाः प्रियतरा इति तर्कयामि, येन नवमालिका कुसुमपेलवा त्वमप्येतेषामालवालपूरणे नियुक्ता।"

शकुन्तला—एष वातेरित पल्लवाङ्गुलीभिस्त्वरयतीव मां केशरवृक्षः।

अनसूया—इयं स्वयंवरवधू बालसहकारस्य त्वया कृतनामधेया नवज्योत्स्नेति नवमालिका एनां विस्मृतासि।

शकुन्तला—तदा आत्मानमपि विस्मरिष्यामि।

इत्थं शकुन्तला प्रकृतीनां पुत्री प्राकृतं वस्तु स्वसोदर्यमिव मन्यते।

शकुन्तलायाः—हस्तिनापुरगमनसमये महर्षिः कण्वः कथयति—

'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या ।
नादत्ते प्रियमण्डनापि भवती स्नेहेन या पल्लवम् ॥
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः ।
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

शकुन्तलाया गमनेन सम्भावित विरहे आश्रमस्य जन्तूनां दशां वर्णयति कविः—

उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥

शकुन्तलाया यात्रा समये पुष्पलताभिः सह मिलति यथा -

शकुन्तला—तात लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये । वनज्योत्स्ने ! चूतसंगतापि मां प्रत्यालिङ्ग इतो गताभिः शाखा-बाहुभिः । अद्य प्रभृति दूरवर्तिनो ते खलु भविष्यामि ।

शकुन्तला मृगीं पश्यन्ती तस्याः संरक्षणार्थं स्वपितरं कण्वं कथयति—'तात एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदा सुखप्रसवा भवति, तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ ।

कण्वः शकुन्तलां कथयति—वत्से !

यस्य त्वया व्रण विरोपणमिङ्गुदीनां
तैलं निषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुटिपरिवर्द्धितको जहाति
सोऽयं न पुत्र कृतकः पदवीं मृगस्ते ॥

शकुन्तला—हला ! पश्य नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्याटहंति दुष्करमकरोमीति तर्कयामि ।

इत्थं शकुन्तला प्रकृतिभिः मिलति। सत्यं शकुन्तला वने पालिता। वन्यजन्तुभिः सह खेलिता। वर्द्धिता सदैवप्राकृतवस्तूनां संरक्षणे तत्परा आसीत्।

शकुन्तला छलछद्मरहिता आर्यकन्या आसीत्। अस्या विवाहानन्तरं राज्ञा तिरस्कारेऽपि स्वकीयं भाग्यमेवाक्रोशति, न राजानम्। इयं पतिव्रता। आदर्शचरित्रा आसीत्। हेमकूटपर्वतेऽपि मारीचाश्रमे प्राकृतिकजन्तुभिः सह निवसति। अस्या बालकः सिंहशावकैः खेलति। इत्थमियं शकुन्तला प्रकृति-पुत्री आसीदिति।

अभिज्ञानशाकुन्तलस्य नायकः

दुष्यन्तः पुरोरवसो वंशोत्पन्नः क्षत्रियजातीयो राजा आसीत्। अस्य राजधानी हस्तिनापुरमासीत्। अयं सनातनधर्मपरिपालको विनीतो राजा सदैव सदाचारं परिपालयतिस्म। राज्ञो दुष्यन्तस्य मनः सदैव धर्माविरुद्धे कार्ये एवाकृष्टं भवति स्म। धर्म विरुद्धे कदापि आकृष्टं न भवति स्म। शकुन्तलां प्रति तस्य हृदये वासनासमुद्भवने स्वयं निर्णेति। यथा—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥

यदा प्रियंवदा राजानं राजर्षिसमुद्भवां शकुन्तलां बोधयति तदा राजा कथयति—

भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः।
आशंससे यदग्निं तदिदं स्पर्शक्षमं रत्नम्॥

एतावता राज्ञो हृदये धर्ममर्यादा विरुद्धं किमपि कार्यं कर्तुं वासना कदापि नासीदिति ज्ञायते।

राजा विनयसम्पन्नो वने स्वसैनिकान् प्रति कथयति 'निवर्तध्वं पूर्वंगतान् वनग्राहिणः, यथा न मे सैनिका स्तपोवनमवरुन्धन्ति' तथा निषेद्धव्या इति।

दुष्यन्तः सदैव परदारं मातृवत् पश्यतिस्म। शकुन्तलां नीत्वा हस्तिनापुरे समुपस्थितानां तपस्विनां स्वागताय राजा परिचायकमाज्ञापयति 'अमूनाश्रमवासिन; श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमपि एतांस्तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि।

राजा दुष्यन्तो दुर्वाससः शापवशात् शकुन्तलां परकीयां पत्नीं मन्यमानः परदारपरिग्रहं सर्वथा धर्मविरुद्धमिति कथयति।

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेपपराङ्मुखी वृत्तिः॥

\+ + +

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्री स्पर्श पांसुलः॥

राजा स्वदारत्यागे च दोषं मन्यते। इत्थं दुष्यन्तो धीरोदात्तनायकः, सनातनधर्मव्रती, स्वकुलमर्यादापरिपालनपरः सत्यनिष्ठो राजा आसीत्।

वार्तालापः

मोहनः—सोहन! कुत्र गम्यते त्वरया?

सोहनः—मोहन! समागतं श्रुतिविषयं भवतो यत् वाराणस्यां एकः लब्धप्रतिष्ठो 'श्री दयानन्दमहाविद्यालय':—अस्ति। यः चिरकालात् शिक्षाप्रचारकार्ये बद्धपरिकरः सन् विराजते, तत्रैव पठनार्थं गच्छामि।

मोहनः—सोहन! किमेतेन मे प्रयोजनं? सन्ति—एतादृशाः बहवो विद्यालयाः अस्मिन् काशीनगरे यत्र शिक्षाव्याजेन व्यापारः क्रियते।

सोहनः—मैवं वद सुहृत्! नातिचिरंगते भूतकाले लोकसौभाग्यसंवर्द्धकाः परमोदारचेतसः—आविर्भूताः प्रातःस्मरणीय श्रीगौरीशंकर प्रसाद-

म्हाभागाः । तत्र तेषां महानुभावानां हृदि समागतम् यत् प्राच्य-प्रतीच्योभयविधशिक्षाप्रचाराय, भारतीयसंस्कृतेः उन्नयनाय एकस्य विद्यालयस्य स्थापना कर्तव्या ।

मोहनः—भवतु नाम ! भारतीयसंस्कृत्या तव किं प्रयोजनम् ? साम्प्रतं तु अधिकांशाः मानवा भारतीयसंस्कृतेः उपहासं कुर्वन्ति तथा तस्याः अनुपयोगित्व प्रकटयन्ति अस्मिन् वैज्ञानिकयुगे । अतः नास्ति एतादृश्याः संस्कृतेः अस्माकं कृते उपयोगः या अस्माकं अशनपानादावपि बाधिका भवति ।

सोहनः—सत्यं प्रज्ञावादी असि ! किं भक्ष्याभक्ष्ये कर्त्तव्याकर्त्तव्ये, विचारा-विचारे स्वैराचरितमेव भवते रोचते ? मित्र ! 'स्वैरमाचरन्ति पशवः-दुर्जनाः राक्षसास्तथा ।'

मोहनः—अस्तु नाम ! किं वैशिष्ट्यम् भारतीय संस्कृतेः यस्याः कृते महाभागैः-एतादृशस्य विशालविद्यालयस्य स्थापना विहिता ?

सोहनः—भारतीयसंस्कृतौ सर्वत्र समुदारभावो जागर्ति सा तु डिंडिमघोषेण प्रतिपादयति यत्—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥

अन्यच्च—मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमद इति उपदेश पुरस्सरं जगदाधारः प्रार्थ्यते—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत् ॥

मोहनः—सुहृदग्रगण्य ! ज्ञातं मया भारतीयसस्कृतेर्वैशिष्ट्यं तथा अस्य विद्या-लयस्य स्थापनायाः उद्देश्यम् सम्यक्तया । श्लाघनीयोऽयं प्रयत्नः । सदा प्रशंसनीयोऽयं विद्यालयो यस्य स्थापना त्यागमूर्त्ति श्रीगौरी-शंकरप्रसादमहाभागैः कृता । भ्रातः ! अनावृतं मे चक्षुषः

पटलम् । सत्यं अद्वितीयोऽयं विद्यालयः । कृपया अस्य विषये किञ्चित् अन्यदपि प्रतिपादय ।

सोहनः—बन्धुवर ! चिरकालात् गुणगण-मण्डितैः पण्डितपुङ्गवैः, श्रीकृष्णानन्दमहाभागैः अलङ्क्रियते अस्य विद्यालयस्य प्रधानाचार्यपदम् । सन्ति-अन्येऽपि गुणैकपक्षभाजो धीमद्वरिष्ठाः स्व-स्व विषये विचक्षणाः विद्वांसः । सहस्रसंख्यापरिमिताश्छात्राः अपि सन्ति साहित्य वाणिज्यादिषु विभागेषु । सार्द्धसप्तवादनादाराभ्यसार्द्धं चतुर्वादनपर्यन्तंमत्र अध्ययन-अध्यापनकार्यं भवति ।

मोहनः—भो वयस्य ! त्वं तत्र कस्यां कक्षायां तथा किं किं च पठसि ?

सोहनः—अहं तत्र द्वादश्यां कक्षायां पठामि । मम पाठ्यविषयाः सन्ति हिन्दी, आंग्लभाषा, नागरिकशास्त्रम्, इतिहासस्तथासस्कृतम् ।

मोहनः—अन्यत् तु सर्वं शोभनं किन्तु संस्कृतभाषा तु 'मृतभाषा' अस्ति सा किमर्थं पठ्यते भवता ।

सोहनः—हन्त ! 'कालो हि दुरतिक्रमः' या भाषा पूर्वमार्यजनतायाःआऋषिकालात् सहचरी बभूव । यस्याः षष्टिप्रतिशतशब्दाः साम्प्रतमपि सर्वासु भारतीयप्रान्तीय-भाषासु वरीवर्तन्ते सैव कैश्चिद् मानवब्रुवैः व्यपदिश्यते । परं 'गतानुगतिको लोकः न लोकः पारमार्थिकः ।' संसारस्य प्रसिद्धो नाट्यकर्ता बर्नार्डशा महोदयः स्वजीवनचरिते वर्णयति "अहं पाठशालां गन्तुं मनसा कदापि नैच्छम् । तत्र ग्रीकलैटिनादिभाषाणामभ्यसनं मामतिकठिन प्रतीयते स्म, किन्त्वैतासामपेक्षया संस्कृतभाषायाः अभ्यासो मया सुकरोऽनुभूयते स्म ।' किं बहुना—यस्याः भाषायाः, विद्वांसः, कवयः स्वं प्रति अधोलिखिताया उक्ते—

साहित्यपाथोनिधिमन्थनोत्थं, कर्णामृतं रक्षत हे कवीन्द्राः ।
यत्तस्य दैत्या इव लुण्ठनाय, काव्यार्थचौराः प्रगुणीभवन्ति ॥

तत्रैवं उत्तरयन्ति—

गृह्णन्तु सर्वे यदि वा यथेच्छम्, नास्ति क्षतिः कापि कवीश्वराणाम् ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैः, अद्यापि रत्नाकर एव सिन्धुः ॥

विशालः शब्दकोशः, सम्पूर्णाशास्त्रीयदृष्टिः, वैज्ञानिकवर्गीकरणम्, अपूर्वरहस्यमयीशक्त्यादिभिः गुणैर्विभूषिता मण्डिता च भाषा कथं मृता स्यात्!

उक्तमपि—

यस्याः प्रभावात् सकला मनुष्याः भाषाश्च जीवन्ति सदैव भूमौ ।
सा देवभाषाः ननु जीवलोके मृता कथं स्यादिति निश्चयो नः ॥

मोहनः— बन्धुवर्य ! सत्यम् अविज्ञातं मया गीर्वाणभाषायाः वैशिष्ट्यं तथा दयानन्दमहाविद्यालयस्य संस्थापकमहाभागानाम् उद्देश्यम् । भणितमपि— 'वादे वादे जायते तत्त्वबोधः ।' जयतु संस्कृतम् तथा संस्थाकपमहाभागानाम् अमरकीर्तिभूतोऽयं भारतीयसंस्कृति-संस्कृत-पोषको विद्यालयः—इति । तथापि—इयमस्ति मम कामना ।

विद्यालयश्चिरायुः स्यात् छात्राः सन्तु गुणैषिणः ।
अध्यापकाः दिगन्तेषु सन्तु विश्रुत कीर्तयः ॥

परिशिष्ट

वैदिक सभ्यता पर प्रकाश डालने वाले मुख्य स्रोत

१—चार वेद	ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद
२—छः वेदांग	शिक्षा, व्याकरण, निरुक्त, छन्द, ज्योतिष, कल्प,
३—छः ब्राह्मण ग्रन्थ	ऐतरेय, सांख्यायन, ताण्ड्य तैत्तरीय, शतपथ, गोपथ
४ आठ आरण्यक ग्रन्थ	बृहद्, काण्व, जैमिनी, छान्दोग्य, ऐतरेय, सांख्यायन, ताण्ड्य, तैत्तरीय
५—१०८ उपनिषद्	ईश, केन, कठ, प्रश्न, कौशतिकी आदि
६—चार सूत्र ग्रन्थ	श्रौत, गृह्य, धर्म, शुल्व
७—छः दर्शन	न्याय, वैशेषिक, सांख्य, योग, मीमांसा, वेदान्त
८ दो महाकाव्य	रामायण और महाभारत
९—अठारह पुराण	मत्स्य, मार्कण्डेय, भागवत, भविष्य आदि जिनकी संख्या के सम्बन्ध में कहा गया है—

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् । अनाप लिङ्ग कूस्कानि पुराणानि प्रचक्षते ।।

लौकिक संस्कृत वाङ्मय के प्रमुख साहित्यकार

१— महाकाव्यकार

कालिदास, अश्वघोष, भारवि, भट्टि, कुमार, माघ, रत्नाकर, हरिश्चन्द्र, कविराज तथा श्रीहर्ष

२—गीति काव्यकार

कालिदास, भर्तृहरि, विल्हण, जयदेव, पण्डितराज जगन्नाथ

३—ऐतिहासिक गद्यकाव्यकार	दण्डी, सुबन्धु, बाणभट्ट, अम्बिकादत्त व्यास
४—ऐतिहासिक महाकाव्यकार	बाणभट्ट, बिल्हण, कल्हण
५—कथा साहित्यकार	विष्णुशर्मा, नारायण पण्डित, गुणाढ्य, क्षेमेन्द्र
६—नाटककार	भास, शूद्रक, कालिदास, विशाखदत्त, भवभूति, भट्टनारायण, जयदेव

७—अलंकार शास्त्र के आचार्य

भरत मुनि, दण्डी आनन्द वर्धन, धनंजय, धनिक, भोजराज, मम्मट, विश्वनाथ, पण्डितराज जगन्नाथ, राजशेखर, अप्पय दीक्षित, जयदेव

कुछ प्रमुख स्मरणीय तिथि-क्रम

ऋग्वेद	— रचनाकाल	२५०० ई० पू० से ३५०० तक (जैकोबी)
	,,	१००० ई० पू० से १२०० तक (मैक्समूलर)
	,,	६००० ई० से पूर्व (लोकमान्य तिलक)
ब्राह्मण ग्रन्थ	,,	८०० ई० पू० से ६०० तक
सूत्र ग्रन्थ	,,	६०० ई० पू० से ४०० तक
पाणिनि	समय	ई० पूर्व सातवीं शताब्दी
भास	,,	ई० पूर्व चतुर्थ शताब्दी
कालिदास	,,	ई० पूर्व प्रथम शताब्दी
भरत मुनि	,,	ई० पूर्व द्वितीय शताब्दी
बाण	,,	ई० छठी शताब्दी
भारवि	,,	ई० छठी शताब्दी का अन्तिम भाग
भवभूति	,,	ई० सातवीं शताब्दी
माघ	,,	ई० सातवीं शताब्दी का अन्तिम भाग
हर्ष	,,	ई० बारहवीं शताब्दी

સંખ્યા - ૨૮૨ —
સ્પૃશ્યાતિ —
શ્રી શ્રાંઝુવાય પુસ્તકાલય
D. ૨૪/૧૦ દેવનાગપુરા